# वेद मन्त्राः

# *Veda Mantras*

DEVANĀGARĪ & RCCS

Vol. 2

www.sanskritweb.net
www.vedavishwa.com

# Bhāgya Sūktam

[Ekāgni Kāṇḍam 1-15 & 2-6 – KYV TB 2-8-9-7 – RV S 7-42 – AV S 3-16]

ॐ प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रम्हणस्पतिं प्रातस्सोममुत रुद्रꣳ हुवेम ॥ १ ॥

ॐ prātarag'nim' prātarin'dragm' havāmahēp'
prātar'mit'rāvaruṇāp' prātaraśh'vināā ।
prātar'bhagam' pūṣhaṇam' bram'haṇas'patim'
prātas'sōmamuta rud'ragm' huvēma ॥ 1 ॥

प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ २ ॥

prātar'jitam' bhagamug'ragm' huvēma vayam'
put'ramaditēr'yō vidhar'tā ।
ād'dhraśh'chid'yam' man'yamānas'turaśh'chid'rājā
chid'yam' bhagam' bhak'ṣhīt'yāha ॥ 2 ॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदव ददन्नः ।
भग प्रणो जनय गोभिरश्वैर्भग प्रनृभिर्नृवन्तस्स्याम ॥ ३ ॥

bhagap' praṇētar'bhaga sat'yarādhō bhagēmān'
dhiyamudava dadan'naḥa ।
bhagap' praṇō janaya gōbhiraśh'vair'bhagap'
pranṛbhir'nṛvan'tas'syāma ॥ 3 ॥

उतेदानीं भगवन्तस्स्यामोत प्रपित्व , उत मध्ये , अन्हाम् ।

utēdānīm' bhagavan'tas'syāmōtap' prapit'va ,
uta madh'yē , an'hāām ।

उतोदि॑ता मघवन्थ्सूर्य॑स्य व॒यं दे॒वाना॑ꣳ सुम॒तौ स्या॑म ॥४॥

utōditā maghavanth'sūr'yas'ya vayan'
dēvānāgm' sumataus' syāma || 4 ||

भग॑ , ए॒व भग॑वाꣳ , अस्तु देवा॒स्तेन॑ व॒यं भग॑वन्तस्स्याम ।
तं त्वा॑ भग स॒र्व , इज्जो॑हवीमि स नो॑ भग पु॒र , ए॒ता भ॑वे॒ह ॥५॥

bhaga , ēva bhagavāgm' , as'tu dēvās'tēna vayam'
bhagavan'tas'syāma |
tan' tvā bhaga sar'va , ij'jōhavīmi sa nō bhaga pura ,
ētā bhavēha || 5 ||

सम॑ध्वरायो॒षसो॑ नमन्त दधि॒क्रावे॑व॒ शुच॑ये प॒दाय॑ ।
अ॒र्वा॒ची॒नं व॑सु॒विदं॒ भग॑ं नो॒ रथ॑मि॒वाश्वा॑ वा॒जिन॒ , आव॑हन्तु ॥६॥

samadh'varāyōṣhasō (a)naman'ta dadhik'rāvēva
śhuchayē padāya |
ar'vāchīnaṁ' vasuvidam' bhagan' nō
rathamivāśh'vā vājina , āvahan'tu || 6 ||

अश्वा॑वती॒र्गोम॑तीर्न , उ॒षासो॑ वी॒रव॑ती॒स्सद॑मुच्छन्तु भ॒द्राः ।
घृतं दुहा॑ना वि॒श्वतः॒ प्रपी॑ना यू॒यं पा॑त स्वस्ति॒भिस्सदा॑ नः ॥७॥

aśh'vāvatīr'gōmatīr'na , uṣhāsō
vīravatīs'sadamut'chhan'tu bhad'rā-ḥa |
ghṛtan' duhānā viśh'vata[fp]' prapīnā yūyam' pātas'
svas'tibhis'sadā naḥa || 7 ||



www.vedavishwa.com

यो मा॑ऽग्ने भा॒गिन॑ꣳ स॒न्तमथा॑भा॒गं चिकी॑-ऋषति ।
अभा॒गम॑ग्ने॒ तं कु॒रु माम॑ग्ने भा॒गिनं॑ कु॒रु स्वाहा॑ ॥८॥

yō māā (a)g'nē bhāginagm'
san'tamathābhāgañ' chikī , ṛṣhati ।
abhāgamag'nē tañ' kuru māmag'nē
bhāginaṅ' kurus' svāhāā ॥ 8 ॥

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

## Īśhāvāsyōpaniṣhat

[SYV – Kāṇva Śhākhā – Vārāṇasī style]

ॐ पूर्ण॑मद॒ः पूर्ण॑मि॒दं पूर्णा॒त्पूर्ण॑मु॒दच्यते ।
पूर्ण॑स्य पूर्ण॑मा॒दाय पूर्ण॑मेवावशि॒ष्यते ॥
ॐ pūr'ṇamada[fp]' pūr'ṇamidam'
pūr'ṇāt'pūr'ṇamudat'chyatē ।
pūr'ṇas'ya pūr'ṇamādāya pūr'ṇamēvāvaśhiṣh'yatē ।

ॐ शान्ति॒ः शान्ति॒ः शान्ति॒ः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

ॐ ई॒शा वा॒स्य॑मि॒दꣳ सर्वं॒ यत्किं च॒ जग॑त्यां॒ जग॑त् ।
तेन॑ त्य॒क्तेन॑ भुञ्जीथा॒ मा गृ॑धः॒ कस्य॑ स्वि॒द्धन॑म् ॥ १ ॥
ॐ īśhā vās'ya-midag'gee sar'vañ'
yat'kiñ' cha jagat'yāñ' jaga-te ।
tēnat' tyak'tēna- bhuñ'jīthā mā
gṛ-dha[hk]' kas'yas' svid'dhanam'm ॥ 1 ॥

www.saivedarishwa.com

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥

kur'van'nēvēha kar'māāṇi
jijīviṣhēt'chhatag'gee samāāḥa ।
ēvam' tvayi nān'yathētōō (a)s'ti na
kar'ma- lip'yatē narēē ॥ 2 ॥

असुर्या नाम ते लोका , अन्धेन तमसावृताः ।
ताꣳस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥३॥

asur'yā nāma tē lōkā , an'dhēna tamasāvṛ-tā-ḥa ।
tāg'ges'tēp' prēt'yābhigat'chhan'ti yē
kē chāat'mahanō janāāḥa ॥ 3 ॥

अनेजदेकं मनसो जवीयो नैनद्देवा , आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥

anēējadēkam' mana-sō javīīyō nainad'dēvā ,
āap'nuvan'pūr'vamar'ṣha-te ।
tad'dhāva-tō (a)n'yānat'yēēti tiṣh'ṭhat'tas'min'n'
napō māātariśh'vāā dadhāti ॥ 4 ॥

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥५॥

tadēējati tan'nēja-ti tad'dūrē tad'van'n'tikē ।
tadan'taras'ya sar'vas'ya tadu
sar'vas'yās'ya bāh'yataḥa ॥ 5 ॥

यस्तु सर्वाँणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न वि जुगुप्सते ॥६॥

yas'tu sar'vāāṇi bhūtān'yāt'man'nēvānupaśh'ya-ti ।
sar'vabhūtēṣhu- chāt'mānan' tatō
na vi ju-gup'satē ॥ 6 ॥

यस्मिन्त्सर्वाँणि भूतान्यात्मैवाभूँद्विजानतः ।
तत्र को मोहः कः शोक , एकत्वमनुपश्यतः ॥७॥

yas'min'tsar'vāāṇi
bhūtān'yāt'maivābhūūd'vijānataḥa ।
tat'ra kō mōha[hk]' kaśh' śhōka- ,
ēkat'vama-nupaśh'ya-taḥa ॥ 7 ॥

स पर्यगाच्छुक्रमकायमव्रँणमस्नाविरꣳ शुद्धमपाँपविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्याँथातथ्यतोऽर्थान्
व्यदधाच्छाश्वतीभ्यः समाँभ्यः ॥८॥

sa par'ya-gāt'chhuk'rama-kāyamav'v'raṇa
mas'nāvirag'gee śhud'dhamapāāpavid'dham ।
kavir'ma-nīṣhī pa-ribhūs' sva-yam'bhūr'
yāāthātath'yatō (a)r'thān'
vya-dadhāt'chhāśh'vatībh'yas' samāābh'yaḥa ॥ 8 ॥

अन्धं तमः प्र विशन्ति येऽविद्यामुपासते ।
an'dhan' tama[fp]'
pra vi-śhan'ti yē (a)vid'yāmupāsa-tē ।



www.sanvedavishwa.net
www.vedavishwa.com

ततो भूयं , इव ते तमो य , उं विद्यायाँ रताः ॥९॥

tatō bhūya- , iva tē tamō ya ,

u- vid'yāyāāg'gee ratā-ḥa ॥ 9 ॥

अन्यदेवाहुर्विद्ययान्यदाँहुरविद्यया ।

इति शुश्रुम धीराँणां ये नस्तद्विचचक्षिरे ॥१०॥

an'yadēvāhur'vid'yayān'yadāāhuravid'yayā ।

iti- śhuśh'ruma dhīrāāṇāñ' yē

nas'tad'vi-chachak'shirē ॥ 10 ॥

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥११॥

vid'yāñ' chāvid'yāñ'

cha yas'tad'vēdōbhayag'gee saha ।

avid'yayā mṛt'yun' tīrt'vā

vid'yayā (a)mṛta-maśh'nutē ॥ 11 ॥

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते ।

ततो भूयं , इव ते तमो य , उ संभूत्यां रताः ॥१२॥

an'dhan' tama[fp]' pravi-śhan'ti

yē (a)sam'm'bhūtimupāsa-tē ।

tatō bhūya- , iva tē tamō ya ,

u sam'bhūut'yāg'gee ratā-ḥa ॥ 12 ॥

अन्यदेवाहुः संभवादन्यदाँहुरसंभवात् ।

an'yadēvāhus'

sam'm'bhavādan'yadāāhurasam'm'bhavā-te ।

www.sarveda.net www.vedavishwa.com

इतिं शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३॥

iti- śhuśh'ruma dhīrāāṇāñ' yē

nas'tad'vi-chachak'ṣhirē ‖ 13 ‖

संभूतिं च विनाशं च यस्तद्वेदोभयं सह ।
विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नुते ॥ १४॥

sam'bhūūtiñ' cha vināśhañ'

cha yas'tad'vēdōbhayag'gee saha ।

vināśhēna- mṛt'yun' tīrt'vā

sam'bhūūt'yā (a)mṛta-maśh'nutē ‖ 14 ‖

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५॥

hiraṇ'mayēēna pāt'rēēṇa

sat'yas'yāpi-hitam' mukham'm ।

tat'tvam' pūūṣhan'napāvṛ-ṇu

sat'yadharm'm'māya dṛṣh'ṭayēē ‖ 15 ‖

पूषन्नेक , ऋषे यम सूर्य प्राजापत्य व्यूह रश्मीन्
त्समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि ।
योऽसावसौ पुरुषः सोऽहमस्मि ॥ १६॥

pūṣhan'n'nēka , ṛṣhē yama sūr'yap'

prājāāpat'yav' vyūūha raśh'mīn'

tsamūūha tējō yat'tēē rūpañ'

kal'yāāṇataman' tat'tēē paśh'yāmi ।

yō (a)sāvasau puru-ṣhas' sō (a)hamas'mi ‖ 16 ‖

www.sarveda.net www.vedavishwa.com

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ।
ॐ ३ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥१७॥

vāyuranī-lamamṛtamathēdam'
bhas'māān'tag'gee śharīīram ।
ॐ 3 kratōs' smara- kṛtag'ges' sma-rak'
kratōs' smara- kṛtag'ges' sma-ra ॥ 17 ॥

अग्ने नय सुपथा राये , अस्मान्विश्वानि देव वयुनानि विद्वान् । (पूर्णमदः...)
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम , उक्तिं विधेम ॥१८॥

ag'nē naya- supathāā rāyē ,
as'mān' viśh'vāāni dēva vayunāāni vid'vā-ne ।
yuyōdh'yas'maj'ju-hurāṇamēnō bhūyiṣh'ṭhān' tē
nama- , uk'tiṁ' vidhēma ॥ 18 ॥ (pūr'ṇamada[fp]...)

ॐ शान्तिः शान्तिः शान्तिः ॥ ॐ ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥ ॐ ॥

www.saivedic.net www.vedavishwa.com

[KYV TA 7]

*pūrvaśhāntipāṭhaḥa*

ॐ शं नों मि॒त्रः शं वरु॑णः । शं नों भवत्वर्य॒मा ।

ॐ śhan' nō mit'raśh'śham' varuṇaḥa ।

śhan' nō bhavat'var'yamā ।

शं न॒, इन्द्रो॒ बृह॒स्पति॑ः । शं नो॒ विष्णु॑रुरुक्र॒मः ।

śhan' na , in'drō bṛhas'patiḥi ।

śhan' nō viṣh'ṇuruk'ramaḥa ।

नमो॒ ब्रम्ह॑णे । नम॑स्ते वायो । त्वमे॒व प्र॒त्यक्षं॒ ब्रम्हा॑सि ।

namōb' bram'haṇē । namas'tē vāyō ।

tvamēvap' prat'yak'sham' bram'hāsi ।

त्वमे॒व प्र॒त्यक्षं॒ ब्रम्ह॑ वदिष्यामि । ऋ॒तं व॑दिष्यामि । स॒त्यं व॑दिष्यामि ।

tvamēvap' prat'yak'sham' bram'ha vadiṣh'yāmi ।

ṛtam' vadiṣh'yāmi । sat'yam' vadiṣh'yāmi ।

तन्माम॑वतु । तद्व॒क्तार॑मवतु । अव॑तु॒ माम् । अव॑तु व॒क्तारम्॑ ।

tan'māmavatu । tad'vak'tāramavatu ।

avatu mām । avatu vak'tāram'm ।

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥ १ ॥

ॐ śhān'tiśh' śhān'tiśh' śhān'tiḥi ॥ 1 ॥

*śhikṣhāśhāstrasaṅgrahaḥa*

शीक्षां व्या॑ख्या॒स्यामः । वर्णः॒ स्वरः । मात्रा॒ बलम् । साम॑ सन्ता॒नः ।

śhīk'ṣhām' vyāākh'yās'yāmaḥa । var'ṇas' svaraḥa ।

māt'rā balam । sāma san'tānaḥa ।



www.sanskritweb.net www.vedavishwa.com

इत्युक्तः शीँक्षाध्यायः ॥२॥

it’yuk’taśh’ śhīīk’ṣhādh’yāyaḥa ॥ 2 ॥

*saṁhitōpāsanam*

सह नौ यशः । सह नौ ब्रंम्हवर्चसम् ।

saha nau yaśhaḥa । saha naub’ bram’havar’chasam ।

अथातः सꣳहिताया , उपनिषदं व्याँख्यास्यामः ।

athātas’ sagm’hitāyā ,

upaniṣhadaṁ’ vyāākh’yās’yāmaḥa ।

पञ्चस्वधिकरणेषु । अधिलोकमधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मम् ।

pañ’chas’vadhikaranēṣhu ।

adhilōkamadhij’yautiṣhamadhi

vid’yamadhip’rajamadh’yāt’mam ।

ता महा सꣳहिता , इत्याचक्षते । अथाधिलोकम् । पृथिवी पूँर्वरूपम् ।

tā mahā sagm’hitā , it’yāchak’ṣhatē ।

athādhilōkam । pṛthivī pūūr’varūpam ।

द्यौरुत्तररूपम् । आकाशः सन्धिः ॥३॥

dyaurut’tararūpam । ākāśhas’ san’dhiḥi ॥ 3 ॥

वायुः सन्धानम् । इत्यधिलोकम् । अथाधिज्यौतिषम् । अग्निः पूँर्वरूपम् ।

vāyus’ san’dhānam । it’yadhilōkam ।

athādhij’yautiṣham । ag’ni[fp]’ pūūr’varūpam ।

आदित्य , उत्तररूपम् । आपः सन्धिः । वैद्युतः सन्धानम् ।

ādit’ya , ut’tararūpam । āpas’san’dhiḥi ।

vaid’yutas’ san’dhānam ।



www.sanatanavedanishwa.com

इत्यधिज्यौतिषम् । अथाधिविद्यम् । आचार्यः पूर्वरूपम् ॥४॥
it'yadhij'yautiṣham । athādhivid'yam ।
āchār'ya[fp]' pūūr'varūpam ॥ 4 ॥

अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनꣳ सन्धानम् ।
an'tēvās'yut'tararūpam ।
vid'yā san'dhiḥi । pravachanagm' san'dhānam ।

इत्यधिविद्यम् । अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररूपम् ।
it'yadhivid'yam । athādhip'rajam ।
mātā pūūr'varūpam । pitōt'tararūpam ।

प्रजा सन्धिः । प्रजननꣳ सन्धानम् । इत्यधिप्रजम् ॥५॥
prajā san'dhiḥi । prajananagm' san'dhānam ।
it'yadhip'rajam ॥ 5 ॥

अथाध्यात्मम् । अधरा हनुः पूर्वरूपम् । उत्तरा हनुरुत्तररूपम् ।
athādh'yāt'mam । adharā hanu[fp]' pūūr'varūpam ।
ut'tarā hanurut'tararūpam ।

वाक्सन्धिः । जिह्वा सन्धानम् । इत्यध्यात्मम् ।
vāk'san'dhiḥi । jih'vā san'dhānam । it'yadh'yāt'mam ।

इतीमा महासꣳहिताः । य , एवमेता महासꣳहिता व्याख्याता वेद ।
itīmā mahāsagm'hitā-ḥa ।
ya , ēvamētā mahāsagm'hitāv' vyākh'yātā vēda ।

www.saiveda.net
www.vedavishwa.com

सन्धीयते प्रजया पशुभिः । ब्रम्हवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ॥६॥
san'dhīyatēp' prajayā paśhubhiḥi |
bram'havar'chasēnān'nād'yēna suvar'gyēṇa lōkēna || 6 ||

*mēdhā ādi-siddhyarthā-āvahantī-hōma-mantrāḥa*

यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्सं बभूव ।
yaśh'chhan'dasāmṛṣhabhō viśh'varūpaḥa |
chhan'dōbh'yō (a)dh'yamṛtāāt'sam' babhūva |

स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् ।
sa mēn'drō mēdhayāās' spṛṇōtu |
amṛtas'ya dēva dhāraṇō bhūyāsam |

शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा ।
śharīram' mē vichar'ṣhaṇam |
jih'vā mē madhumat'tamā |

कर्णाभ्यां भूरि विश्रुवम् । ब्रम्हणः कोशोऽसि मेधयाऽपिहितः ।
kar'ṇāābh'yām' bhūri viśh'ruvam |
bram'haṇa[hk]'
kōśhō (a)si mēdhayā (a)pihitaḥa |

श्रुतं मे गोपाय । आवहन्ती वितन्वाना ॥७॥
śhrutam' mē gōpāya | āvahan'tī vitan'vānā || 7 ||

कुर्वाणाऽचीरमात्मनः । वासांसि मम गावश्च ।
kur'vāṇā (a)chīramāt'manaḥa |
vāsāgm'si mama gāvaśh'cha |

अन्नपाने च सर्वदा । ततो मे श्रियमावह ।

an’napānē cha sar’vadā | tatō mēśh’ śhriyamāvaha |

लोमशां पशुभिः सह स्वाहा । आ मायन्तु ब्रम्हचारिणः स्वाहा ।

lōmaśhām’ paśhubhis’sahas’ svāhāā |

ā mā yan’tub’ bram’hachāriṇas’ svāhāā |

वि माऽऽयन्तु ब्रम्हचारिणः स्वाहा । प्र माऽऽयन्तु ब्रम्हचारिणः स्वाहा ।

vi mā (ā)yan’tub’ bram’hachāriṇas’ svāhāā |

pra mā (ā)yan’tub’ bram’hachāriṇas’ svāhāā |

दमायन्तु ब्रम्हचारिणः स्वाहा । शमायन्तु ब्रम्हचारिणः स्वाहा ॥८॥

damāyan’tub’ bram’hachāriṇas’ svāhāā |

śhamāyan’tub’ bram’hachāriṇas’ svāhāā || 8 ||

यशो जनेऽसानि स्वाहा । श्रेयान्-वस्यसोऽसानि स्वाहा ।

yaśhō janē (a)sānis’ svāhāā |

śhrēyā-ne vas’yasō (a)sānis’ svāhāā |

तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा ।

tan’ tvā bhagap’ praviśhānis’ svāhāā |

sa mā bhagap’ praviśhas’ svāhāā |

तस्मिन् सहस्रशाखे । नि भगाहं त्वयि मृजे स्वाहा ।

tas’min’n’ sahas’raśhākhē |

ni bhagāhan’ tvayi mṛjēs’ svāhāā |

यथाऽऽपः प्रवता यन्ति । यथा मासा , अहर्जरम् ।

yathā (ā)pa[fp]’ pravatā yan’ti |

yathā māsā , ahar’jaram |

एवं मां ब्रंम्हचारिणः । धातरायन्तु सर्वतः स्वाहा । 
प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व ॥९॥

ēvam' mām' bram'hachāriṇaḥa I
dhātarāyan'tu sar'vatas' svāhaā I
prativēśhō (a)sip' pra mā bhāhip'
pra mā pad'yas'va II 9 II

*vyāhṛtyupāsanam*

भूर्भुवः सुवरिति वा , एतास्तिस्रो व्याहृतयः ।
तासामु ह स्मै तां चतुर्थीम् ।

bhūr'bhuvas' suvariti vā ,
ētās'tis'rōv' vyāhṛtayaḥa I
tāsāmu has' smai tāñ' chatur'thīm I

माहाचमस्यः प्रवेदयते । मह , इति । तद्ब्रम्ह । स , आत्मा ।

māhāchamas'ya[fp]' pravēdayatē I
maha , iti I tad'bram'ha I sa , āt'mā I

अङ्गान्यन्या देवताः । भूरिति वा , अयं लोकः ।

aṅ'gāān'yan'yā dēvatāāḥa I bhūriti vā , ayaṁ' lōkaḥa I

भुव , इत्यन्तरिक्षम् । सुवरित्यसौ लोकः ॥१०॥

bhuva , it'yan'tarik'ṣham I suvarit'yasau lōkaḥa II 10 II

मह , इत्यादित्यः । आदित्येन वाव सर्वे लोका महीयन्ते ।

maha , it'yādit'yaḥa I
ādit'yēna vāva sar'vē lōkā mahīyan'tē I



www.sanskritdocuments... www.vedavishwa.com

भूरिति वा , अग्निः । भुव , इति वायुः ।

bhūriti vā , ag'niḥi । bhuva , iti vāyuḥu ।

सुवरित्यादित्यः । मह , इति चन्द्रमाः ।

suvarit'yādit'yaha ।

maha , iti chan'dramāāḥa ।

चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते । भूरिति वा , ऋचः ।

chan'dramasā vāva sar'vāṇij'

jyōtīgm'ṣhi mahīyan'tē ।

bhūriti vā , ṛchaḥa ।

भुव , इति सामानि । सुवरिति यजूंषि ॥ ११ ॥

bhuva , iti sāmāni । suvariti yajūgm'ṣhi ॥ 11 ॥

मह , इति ब्रम्ह । ब्रम्हणा वाव सर्वे वेदा महीयन्ते ।

maha , itib' bram'ha ।

bram'haṇā vāva sar'vē vēdā mahīyan'tē ।

भूरिति वै प्राणः । भुव , इत्यपानः । सुवरिति व्यानः । मह , इत्यन्नम् ।

bhūriti vaip' prāṇaḥa । bhuva , it'yapānaḥa ।

suvaritiv' vyānaḥa । maha , it'yan'nam'm ।

अन्नेन वाव सर्वे प्राणा महीयन्ते । ता वा , एताश्चतस्रश्चतुर्धा ।

an'nēna vāva sar'vēēp' prāṇā mahīyan'tē ।

tā vā , ētāśh'chatas'raśh'chatur'dhā ।

चतस्रश्चतस्रो व्याहृतयः । ता यो वेद ।

chatas'raśh'chatas'rōv' vyāhṛtayaḥa । tā yō vēda ।

www.saiveda.net
www.vedavishwa.com

स वेद ब्रम्ह । सर्वेऽस्मै देवा बलिमावहन्ति ॥१२॥

sa vēdab’ bram’ha |

sar’vēē (a)s’mai dēvā balimāvahan’ti || 12 ||

*manōmayatvādi-guṇaka-bramhōpāsanayā-svārājya-siddhiḥi*

स य , एषोऽन्तरहृदय , आकाशः । तस्मिन्नयं पुरुषो मनोमयः ।

sa ya , ēṣhōō (a)n’tarahṛdaya , ākāśhaḥa |

tas’min’nayam’ puruṣhō manōmayaḥa |

अमृतो हिरण्मयः । अन्तरेण तालुके ।

amṛtō hiraṇ’mayaḥa | an’tarēṇa tālukē |

य , एष स्तन , इवावलम्बते । सेन्द्रयोनिः ।

ya , ēṣhas’ stana , ivāvalam’batē | sēēn’drayōniḥi |

यत्रासौ केशान्तो विवर्तते । व्यपोह्य शीर्षकपाले ।

yat’rāsau kēśhān’tō vivar’tatē |

vyapōh’ya śhīr’ṣhakapālē |

भूरित्यग्नौ प्रतितिष्ठति । भुव , इति वायौ ॥१३॥

bhūrit’yag’naup’ pratitiṣh’ṭhati |

bhuva , iti vāyau || 13 ||

सुवरित्यादित्ये । मह , इति ब्रम्हणि ।

आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम् ।

suvarit’yādit’yē | maha , itib’ bram’haṇi |

āp’nōtis’ svārāāj’yam | āp’nōti manasas’patim’m |

www.saivedavishwa.net www.vedavishwa.com

वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः ।
vāk’patiśh’chak’ṣhuṣh’patiḥi |
śhrōt’rapatir’vij’ñānapatiḥi |

एतत्ततो भवति । आकाशशरीरं ब्रम्ह ।
ētat’tatō bhavati | ākāśhaśharīram’ bram’ha |

सत्यात्म प्राणारामं मन , आनन्दम् ।
शान्तिसमृद्धममृतम् । इति प्राचीनयोग्योपास्स्व ॥ १४ ॥
sat’yāt’map’ prāṇārāmam’ mana , ānan’dam |
śhān’tisamṛd’dhamamṛtam’m |
itip’ prāchīnayōg’yōpāās’sva || 14 ||

*pṛthivyādyupādhika-pañchabramhōpāsanam*

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः ।
अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि ।
pṛthiv’yan’tarik’shan’ dyaur’dishō (a)vān’taradiśhā-ḥa |
ag’nir’vāyurādit’yaśh’chan’dramā nak’ṣhat’rāṇi |

आप , ओषधयो वनस्पतय , आकाश , आत्मा ।
इत्यधिभूतम् । अथाध्यात्मम् ।
āpa , ōṣhadhayō vanas’pataya , ākāśha , āt’mā |
it’yadhibhūtam | athādh’yāt’mam |

प्राणो व्यानोऽपान , उदानस्समानः । चक्षुश्श्रोत्रं मनो वाक्त्वक् ।
prāṇōv’ vyānō (a)pāna , udānas’samānaḥa |
chak’ṣhuśh’śhrōt’ram’ manō vāk’tvake |

www.saiveda.net
www.vedavishwa.com

चर्म॑ मा॒ꣳसꣳ॒ स्नावास्थि॑ म॒ज्जा । ए॒तद॑धिवि॒धा॒य॒ , ऋ॒षि॒रवो॑चत् ।
char'ma māgm'sag'ges' snāvās'thi maj'jā |
ētadadhividhāya , ṛṣhiravōchate |

पाङ्क्तं॑ वा , इ॒दꣳ सर्व॑म् । पाङ्क्ते॑नै॒व पाङ्क्तꣳ॑ स्पृणो॒तीति॑ ॥१५॥
pāṅ'ktaṁ' vā , idagm' sar'vam'm |
pāṅ'ktēnaiva pāṅ'ktag'ges' spṛṇōtīti || 15 ||

*praṇavōpāsanam*

ओ मिति॒ ब्रम्ह॑ । ओमिती॒दꣳ सर्व॑म् ।
ōmitib' bram'ha | ōmitīdagm' sar'vam'm |

ओमित्ये॒तद॑नुकृति ह स्म॒ वा , अप्यो॒ श्रा॑व॒येत्याश्रा॑वयन्ति ।
ōmit'yētadanukṛti has' sma vā ,
ap'yōśh' śhrāvayēt'yāśh'rāvayan'ti |

ओमिति॒ सामा॑नि गायन्ति । ओꣳ शोमिति॑ श॒स्त्राणि॑ शꣳसन्ति ।
ōmiti sāmāni gāyan'ti |
ōgm' śhōmiti śhas'trāṇi śhagm'san'ti |

ओमित्य॑ध्व॒र्युः प्र॑तिग॒रं प्रति॑गृणाति । ओमिति॒ ब्रम्हा॒ प्रसौ॑ति ।
ōmit'yadh'var'yu[fp]' pratigaram' pratigṛṇāti |
ōmitib' bram'hāp' prasauti |

ओमित्य॑ग्निहो॒त्रमनु॑जानाति ।
ōmit'yag'nihōt'ramanujānāti |

www.saiveda.net www.vedavisnwa.com

ओमिति ब्राम्हणः प्रवक्ष्यन्नाह ब्रम्होपाप्नवानीति । ब्रम्हैवोपाप्नोति ॥ १६ ॥

ōmitib' brām'haṇa[fp]' pravak'ṣhyan'nāhab'

bram'hōpāāp'navāniti |

bram'haivōpāāp'nōti || 16 ||

*svādhyāya-praśhaṁsā*

ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च ।

ṛtañ' chas' svādh'yāyap'ravachanē cha |

sat'yañ' chas' svādh'yāyap'ravachanē cha |

तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च ।

tapaśh'chas' svādh'yāyap'ravachanē cha |

damaśh'chas' svādh'yāyap'ravachanē cha |

शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च ।

śhamaśh'chas' svādh'yāyap'ravachanē cha |

ag'nayaśh'chas' svādh'yāyap'ravachanē cha |

अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च ।

ag'nihōt'rañ' chas' svādh'yāyap'ravachanē cha |

atithayaśh'chas' svādh'yāyap'ravachanē cha |

मानुषं च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च ।

mānuṣhañ' chas' svādh'yāyap'ravachanē cha |

prajā chas' svādh'yāyap'ravachanē cha |

www.saiveda.net
www.vedarishwa.com

प्रजनश्च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च ।

prajanaśh'chas' svādh'yāyap'ravachanē cha ।

prajātiśh'chas' svādh'yāyap'ravachanē cha ।

सत्यमिति सत्यवचा राथीतरः । तप , इति तपोनित्यः पौरुशिष्टिः ।

sat'yamiti sat'yavachā rāthītaraḥa ।

tapa , iti tapōnit'ya[fp]' pauruśhiṣh'ṭiḥi ।

स्वाध्यायप्रवचने , एवेति नाको मौद्गल्यः ।

तद्धि तपस्तद्धि तपः ॥ १७॥

svādh'yāyap'ravachanē , ēvēti nākō maud' gal'yaḥa ।

tad'dhi tapas'tad'dhi tapaḥa ॥ 17 ॥

*bramhajñāna-prakāśhaka-mantrāḥa*

अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव ।

ahaṁ' vṛk'ṣhas'ya rērivā ।

kīr'ti[fp]' pṛṣh'ṭhaṁ' girēriva ।

ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि ।

ūr'dhvapavit'rō vājinīvas' svamṛtamas'mi ।

द्रविणꣳ सवर्चसम् । सुमेधा , अमृतोक्षितः ।

dravinagm' savar'chasam । sumēdhā , amṛtōk'ṣhitaḥa ।

इति त्रिशङ्कोर्वेदानुवचनम् ॥ १८॥

itit' triśhaṅ'kōr'vēdānuvachanam ॥ 18 ॥

www.shivedavishwa.com www.vedavishwa.com

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर ।

vēdamanūch’yāchār’yō (a)n’tēvāsinamanuśhās’ti ।
sat’yaṁ’ vada । dhar’mañ’ chara ।

स्वाध्यायान्मा प्रमदः ।

आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ।

svādh’yāyān’māp’ pramadaḥa ।
āchār’yāyap’ priyan’ dhanamāhṛt’yap’ prajātan’tum’
māv’ vyavat’chhēt’sī-ḥi ।

सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् ।

sat’yān’nap’ pramaditav’yam ।
dhar’mān’nap’ pramaditav’yam ।

कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् ।

kuśhalān’nap’ pramaditav’yam ।
bhūt’yainap’ pramaditav’yam ।

स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १९ ॥

svādh’yāyap’ravachanābh’yān’
nap’ pramaditav’yam ॥ 19 ॥

देवपितृकार्याभ्यां न प्रमदितव्यम् ।

मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।

dēvapitṛkār’yābh’yān’ nap’ pramaditav’yam ।
mātṛdēvō bhava । pitṛdēvō bhava ।
āchār’yadēvō bhava । atithidēvō bhava ।

यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि ।

yān'yanavad'yāni kar'māṇi | tāni sēvitav'yāni |

नो , इतराणि । यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि ॥२०॥

nō , itarāṇi | yān'yas'mākagm' sucharitāni |

tānit' tvayōpās'yāni || 20 ||

नो , इतराणि । ये के चास्मच्छ्रेयाꣳसो ब्राम्हणाः ।

nō , itarāṇi |

yē kē chās'mat'chhrēyāgm'sōb' brām'haṇā-ḥa |

तेषां त्वयाऽऽसनेन प्रश्वसितव्यम् ।

tēṣhān' tvayā (ā)sanēnap' praśh'vasitav'yam |

श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् ।

śhrad'dhayā dēyam | aśh'rad'dhayā (a)dēyam |

śhriyā dēyam |

ह्रिया देयम् । भिया देयम् । संविदा देयम् ।

hriyā dēyam | bhiyā dēyam | saṁ'vidā dēyam |

अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥२१॥

atha yadi tē kar'mavichikit'sā

vā vṛt'tavichikit'sā vās' syā-te || 21 ||

ये तत्र ब्राम्हणाः संमर्शिनः । युक्ता , आयुक्ताः ।

yē tat'rab' brām'haṇāās'sam'mar'śhinaḥa |

yuk'tā , āyuk'tā-ḥa |



www.saiveda.net www.vedavishwa.com

अलूक्षा धर्मकामास्स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः ।
alūk’ṣhā dhar’makāmās’syuḥu ।
yathā tē tat’ra var’tēran’ne । tathā tat’ra var’tēthā-ḥa ।

अथाभ्याख्यातेषु । ये तत्र ब्राम्हणाः संमर्शिनः । युक्ता , आयुक्ताः ।
athābh’yaākh’yātēṣhu ।
yē tat’rab’ brām’haṇāas’ sam’mar’śhinaḥa ।
yuk’tā , āyuk’tā-ḥa ।

अलूक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः ।
alūk’ṣhā dhar’makāmās’ syuḥu ।
yathā tē tēṣhu var’tēran’ne । tathā tēṣhu var’tēthā-ḥa ।

एष , आदेशः । एष , उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् ।
ēṣha , ādēśhaḥa । ēṣha , upadēśhaḥa ।
ēṣhā vēdōpaniṣhate । ētadanuśhāsanam ।

एवमुपासितव्यम् । एवमु चैतदुपास्यम् ॥२२॥
ēvamupāsitav’yam । ēvamu chaitadupās’yam ॥ 22 ॥

*uttaraśhāntipāṭhaḥa*

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा ।
śhan’ nō mit’raśh’śhaṁ’ varuṇaḥa ।
śhan’ nō bhavat’var’yamā ।

शं न , इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः ।
śhan’ na , in’drō bṛhas’patiḥi ।
śhan’ nō viṣh’ṇururuk’ramaḥa ।



www.saiveda.net www.vedavishwa.com

नमो॒ ब्रम्ह॑णे । नम॑स्ते वायो । त्वमे॒व प्र॒त्यक्षं॒ ब्रम्हा॑सि ।

namōb' bram'haṇē I namas'tē vāyō I

tvamēvap' prat'yak'ṣham' bram'hāsi I

त्वामे॒व प्र॒त्यक्षं॒ ब्रम्हावा॑दिषम् । ऋ॒तमं॑वादिषम् । स॒त्यमं॑वादिषम् ।

tvāmēvap' prat'yak'ṣham' bram'hāvādiṣham I

ṛtamavādiṣham I sat'yamavādiṣham I

तन्मामा॑वीत् । तद्व॒क्तार॑मावीत् । आवी॒न्माम् । आवी॒द्व॒क्तार॒म् ॥२३॥

tan'māmāvī-te I tad'vak'tāramāvī-te I

āvīn'mām I āvīid'vak'tāram'm II 23 II

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi II

www.vedavishwa.com
www.vedavishwa.com

[KYV TA 8]

*śhāntipāṭhaḥa*

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ saha nāvavatu | saha nau bhunak'tu |
saha vīr'yaṅ' karavāvahai |
tējas'vi nāvadhītamas'tu mā vid'viṣhāvahaiī |

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

*upaniṣhatsārasaṅgrahaḥa*

ॐ ब्रम्हविदाप्नोति परम् । तदेषाऽभ्युक्ता ।

ॐ bram'havidāāp'nōti param'm | tadēṣhā (a)bh'yuk'tā |

सत्यं ज्ञानमनन्तं ब्रम्ह । यो वेद निहितं गुहायां परमे व्योमन् ।

sat'yañ' jñānamanan'tam' bram'ha |
yō vēda nihitaṅ' guhāyām' paramēv' vyōman'ne |

सोऽश्नुते सर्वान् कामान्सह । ब्रम्हणा विपश्चितेति ।

sōō (a)śh'nutē sar'vān' kāmāān'saha |
bram'haṇā vipaśh'chitēti |

तस्माद्वा , एतस्मादात्मनः , आकाशस्सम्भूतः । आकाशाद्वायुः ।

tas'mād'vā , ētas'mādāt'mana , ākāśhas'sam'bhūtaḥa |
ākāśhād'vāyuḥu |

वा॒योर॒ग्निः । अ॒ग्नेराप॑ः । अ॒द्भ्यः पृ॑थि॒वी । पृ॒थि॒व्या , ओष॑धयः ।
ओष॑धी॒भ्योऽन्न॒म् । अन्ना॒त्पुरु॑षः ।

vāyōrag'niḥi | ag'nērāpaḥa | ad'bhya[fp]' pṛthivī |
pṛthiv'yā , ōṣhadhayaḥa | ōṣhadhībh'yō (a)n'nam'm |
an'nāt'puruṣhaḥa |

स वा , एष पुरुषोऽन्न॑रसम॒यः । तस्येद॑मे॒व शिरः । अयं दक्षि॑णः प॒क्षः ।
sa vā , ēṣha puruṣhō (a)n'narasamayaḥa |
tas'yēdamēva śhiraḥa | ayan' dak'ṣhiṇa[fp]' pak'ṣhaḥa |

अयमुत्त॑रः प॒क्षः । अयमात्मा॓ । इदं पुच्छं॑ प्रति॒ष्ठा ।
तदप्येष श्लोको॑ भवति ॥ १ ॥

ayamut'tara[fp]' pak'ṣhaḥa | ayamāt'māā |
idam' put'chham' pratiṣh'ṭhā |
tadap'yēṣhaśh' śhlōkō bhavati || 1 ||

*pañchakōśha-vivaraṇam*

अन्ना॒द्वै प्र॒जाः प्र॒जाय॑न्ते । याः काश्च॑ पृथि॒वीꣳ श्रि॒ताः ।
an'nād'vaip' prajā[fp]' prajāyan'tē |
yā[hk]' kāśh'cha pṛthivīgeśh' śhritā-ḥa |

अथो॒ , अन्ने॑नै॒व जीव॑न्ति । अथै॒नदपि॑ यन्त्यन्त॒तः ।
athō , an'nēnaiva jīvan'ti |
athainadapi yan'tyan'tataḥa |

अन्नꣳ॒ हि भू॒तानां॒ ज्येष्ठ॓म् । तस्मा॓त् सर्वौष॒धमु॑च्यते ।
an'nagm' hi bhūtānāñ' jyēṣh'ṭham'm |
tas'māāt' sar'vauṣhadhamuch'yatē |

सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रम्होपासते ।
sar'vaṁ' vai tē (a)n'namāp'nuvan'ti ।
yē (a)n'nam' bram'hōpāsatē ।

अन्नꣳ हि भूतानां ज्येष्ठम् । तस्मात् सर्वौषधमुच्यते ।
an'nagm' hi bhūtānāñ' jyēṣh'ṭham'm ।
tas'māāt' sar'vauṣhadhamuch'yatē ।

अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते ।
an'nāād'bhūtāni jāyan'tē ।
jātān'yan'nēna var'dhan'tē ।

अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत , इति ।
ad'yatē (a)t'ti cha bhūtāni ।
tas'mādan'nan' taduch'yata , iti ।

तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर , आत्मा प्राणमयः ।
tas'mād'vā , ētas'mādan'narasamayā-te ।
an'yō (a)n'tara , āt'māāp' prāṇamayaḥa ।

तेनैष पूर्णः । स वा , एष पुरुषविध , एव ।
tēnaiṣha pūr'ṇaḥa । sa vā , ēṣha puruṣhavidha , ēva ।

तस्य पुरुषविधताम् । अन्वयं पुरुषविधः ।
tas'ya puruṣhavidhatām । an'vayam' puruṣhavidhaḥa ।

तस्य प्राण , एव शिरः । व्यानो दक्षिणः पक्षः ।
tas'yap' prāṇa , ēva śhiraḥa ।
vyānō dak'ṣhiṇa[fp]' pak'ṣhaḥa ।



www.vaidikavishwa.com

अपान , उत्तरः पक्षः । आकाश , आत्मा ।

apāna , ut'tara[fp]' pak'ṣhaḥa । ākāśha , āt'mā ।

पृथिवी पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ २ ॥

pṛthivī put'chham' pratiṣh'ṭhā ।

tadap'yēṣhaśh' śhlōkō bhavati ॥ 2 ॥

प्राणं देवा , अनुप्राणन्ति । मनुष्याः पशवश्च ये ।

prāṇan' dēvā , anup'rāṇan'ti ।

manuṣh'yāā[fp]' paśhavaśh'cha yē ।

प्राणो हि भूतानामायुः । तस्मात् सर्वायुषमुच्यते ।

prāṇō hi bhūtānāmāyuḥu ।

tas'māt' sar'vāyuṣhamuch'yatē ।

सर्वमेव त , आयुर्यन्ति । ये प्राणं ब्रम्होपासते ।

sar'vamēva ta , āyur'yan'ti ।

yēp' prāṇam' bram'hōpāsatē ।

प्राणो हि भूतानामायुः । तस्मात् सर्वायुषमुच्यत , इति ।

prāṇō hi bhūtānāmāyuḥu ।

tas'māt' sar'vāyuṣhamuch'yata , iti ।

तस्यैष , एव शारीर , आत्मा । यः पूर्वस्य ।

tas'yaiṣha , ēva śhārīra , āt'mā । ya[fp]' pūr'vas'ya ।

तस्माद्वा , एतस्मात् प्राणमयात् । अन्योऽन्तर , आत्मा मनोमयः ।

tas'mād'vā , ētas'māt' prāṇamayā-te ।

an'yō (a)n'tara , āt'mā manōmayaḥa ।



www.saivedavishwa.com

तेनैष पूर्णः । स वा , एष पुरुषविध , एव ।
tēnaiṣha pūr'ṇaḥa । sa vā , ēṣha puruṣhavidha , ēva ।

तस्य पुरुषविधताम् । अन्वयं पुरुषविधः ।
tas'ya puruṣhavidhatām । an'vayam' puruṣhavidhaḥa ।

तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः ।
tas'ya yajurēva śhiraḥa । ṛg'dak'ṣhiṇa[fp]' pak'ṣhaḥa ।

सामोत्तरः पक्षः । आदेश , आत्मा ।
sāmōt'tara[fp]' pak'ṣhaḥa । ādēśha , āt'mā ।

अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ३ ॥
athar'vāṅ'girasa[fp]' put'chham' pratiṣh'ṭhā ।
tadap'yēṣhaśh' śhlōkō bhavati ॥ 3 ॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह ।
yatō vāchō nivar'tan'tē । ap'rāap'ya manasā saha ।

आनन्दं ब्रम्हणो विद्वान् । न बिभेति कदाचनेति ।
ānan'dam' bram'haṇō vid'vā-ne ।
na bibhēti kadāchanēti ।

तस्यैष , एव शारीर , आत्मा । यः पूर्वस्य ।
tas'yaiṣha , ēva śhārīra , āt'mā । ya[fp]' pūr'vas'ya ।

तस्माद्वा , एतस्मान्मनोमयात् । अन्योऽन्तर , आत्मा विज्ञानमयः ।
tas'mād'vā , ētas'māan'manōmayā-te ।
an'yō (a)n'tara , āt'mā vij'ñānamayaḥa ।

तेनैष पूर्णः । स वा , एष पुरुषविध , एव ।

tēnaiṣha pūr’ṇaḥa | sa vā , ēṣha puruṣhavidha , ēva |

तस्य पुरुषविधताम् । अन्वयं पुरुषविधः ।

tas’ya puruṣhavidhatām |

an’vayam’ puruṣhavidhaḥa |

तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः ।

tas’yaśh’ śhrad’dhaiva śhiraḥa |

ṛtan’ dak’ṣhiṇa[fp]’ pak’ṣhaḥa |

सत्यमुत्तरः पक्षः । योग , आत्मा ।

sat’yamut’tara[fp]’ pak’ṣhaḥa | yōga , āt’mā |

महः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥४॥

maha[fp]’ put’chham’ pratiṣh’ṭhā |

tadap’yēṣhaśh’ śhlōkō bhavati || 4 ||

विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च ।

vij’ñānañ’ yaj’ñan’ tanutē | kar’māṇi tanutē (a)pi cha |

विज्ञानं देवास्सर्वे । ब्रम्ह ज्येष्ठमुपासते ।

vij’ñānan’ dēvās’sar’vē |

bram’haj’ jyēṣh’ṭhamupāsatē |

विज्ञानं ब्रम्ह चेद्वेद । तस्माच्चेन्न प्रमाद्यति ।

vij’ñānam’ bram’ha chēd’vēda |

tas’māt’chēn’nap’ pramād’yati |

www.vedavishwa.com
www.saiveda.net

शरीरें पाप्मनो हित्वा । सर्वान्कामान्समश्नुत , इति ।

śharīrē pāp'manō hit'vā ।

sar'vān'kāmān'samaśh'nuta , iti ।

तस्यैष , एव शारीर , आत्मा । यः पूर्वस्य ।

tas'yaiṣha , ēva śhārīra , āt'mā । ya[fp]' pūr'vas'ya ।

तस्माद्वा , एतस्माद्विज्ञानमयात् । अन्योऽन्तर , आत्माऽऽनन्दमयः ।

tas'mād'vā , ētas'mād'vij'ñānamayā-te ।

an'yō (a)n'tara , āt'mā (ā)nan'damayaḥa ।

तेनैष पूर्णः । स वा , एष पुरुषविध , एव ।

tēnaiṣha pūr'ṇaḥa । sa vā , ēṣha puruṣhavidha , ēva ।

तस्य पुरुषविधताम् । अन्वयं पुरुषविधः ।

tas'ya puruṣhavidhatām ।

an'vayam' puruṣhavidhaḥa ।

तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः ।

tas'yap' priyamēva śhiraḥa ।

mōdō dak'ṣhiṇa[fp]' pak'ṣhaḥa ।

प्रमोद , उत्तरः पक्षः । आनन्द , आत्मा ।

pramōda , ut'tara[fp]' pak'ṣhaḥa । ānan'da , āt'mā ।

ब्रम्ह पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥५॥

bram'ha put'chham' pratiṣh'ṭhā ।

tadap'yēṣhaśh' śhlōkō bhavati ॥ 5 ॥

www.sriveda.net www.vedavishwa.com

असन्नेव स भवति । असद्ब्रम्हेति वेद चेत् ।

asan’nēva sa bhavati I asad’bram’hēti vēda chē-te I

अस्ति ब्रम्हेति चेद्वेद । सन्तमेनं ततो विदुरिति ।

as’tib’ bram’hēti chēd’vēda I

san’tamēnan’ tatō viduriti I

तस्यैष , एव शारीर , आत्मा । यः पूर्वस्य ।

tas’yaiṣha , ēva śhārīra , āt’mā I ya[fp]’ pūr’vas’ya I

अथातोऽनुप्रश्नाः । उताविद्वानमुं लोकं प्रेत्य ।

athātō (a)nup’raśh’nā-ḥa I

utāvid’vānamuṁ’ lōkam’ prēt’ya I

कश्चन गच्छती३ । आहो विद्वानमुं लोकं प्रेत्य ।

kaśh’chana gat’chhatī3 I

āhō vid’vānamuṁ’ lōkam’ prēt’ya I

कश्चित्समश्नुता३ उ । सोऽकामयत ।

kaśh’chit’samaśh’nutā3 , u I sō (a)kāmayata I

बहु स्यां प्रजायेयेति । स तपोऽतप्यत ।

bahus’ syām’ prajāyēyēti I sa tapō (a)tap’yata I

स तपस्तप्त्वा । इदꣳ सर्वमसृजत ।

sa tapas’tap’tvā I idagm’ sar’vamasṛjata I

यदिदं किञ्च । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य ।

yadidaṅ’ kiñ’cha I tat’sṛṣh’ṭvā I

tadēvānup’rāviśhate I tadanup’raviśh’ya I



www.saiveda.net www.vedavishwa.com

सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च ।

sat’chat’ tyat’chābhavate I

niruk’tañ’ chāniruk’tañ’ cha I

निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च ।

nilayanañ’ chānilayanañ’ cha I

vij’ñānañ’ chāvij’ñānañ’ cha I

सत्यं चानृतं च सत्यमभवत् । यदिदं किञ्च ।

sat’yañ’ chānṛtañ’ cha sat’yamabhavate I

yadidaṅ’ kiñ’cha I

तत्सत्यमित्याचक्षते । तदप्येष श्लोको भवति ॥ ६ ॥

tat’sat’yamit’yāchak’ṣhatē I

tadap’yēṣhaśh’ śhlōkō bhavati II 6 II

*abhaya-pratiṣhṭhā*

असद्वा , इदमग्र , आसीत् । ततो वै सदजायत ।

asad’vā , idamag’ra , āsī-te I tatō vai sadajāyata I

तदात्मानꣳ स्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत , इति ।

tadāt’mānag’ges’ svayamakuruta I

tas’māt’tat’sukṛtamuch’yata , iti I

यद्वै तत् सुकृतम् । रसो वै सः ।

yad’vai tat’ sukṛtam I rasō vai saḥ I

www.vedavishwa.com

रसङ्ग् ह्येवायं लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात्कः प्राण्यात् ।
rasag'geh' hyēvāyaṁ' lab'dhvā (ā)nan'dī bhavati ।
kōh' hyēvān'yāāt'ka[fp]' prāṇ'yā-te ।

यदेष , आकाश , आनन्दो न स्यात् । एष ह्येवाऽऽनन्दयाति ।
yadēṣha , ākāśha , ānan'dō nas' syā-te ।
ēṣhah' hyēvā (ā)nan'dayāti ।

यदा ह्येवैष , तस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते ।
अथ सोऽभयं गतो भवति ।
yadāh' hyēvaiṣha , ētas'min'nadṛśh'yē (a)nāt'myē
(a)niruk'tē (a)nilayanē (a)bhayam'
pratiṣh'ṭhāṁ' vin'datē ।
atha sō (a)bhayaṅ' gatō bhavati ।

यदा ह्येवैष , एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति ।
yadāh' hyēvaiṣha , ētas'min'nudaraman'taraṅ' kurutē ।
atha tas'ya bhayam' bhavati ।

तत्त्वेव भयं विदुषोऽमन्वानस्य । तदप्येष श्लोको भवति ॥७॥
tat'tvēva bhayaṁ' viduṣhō (a)man'vānas'ya ।
tadap'yēṣhaśh' śhlōkō bhavati ॥ 7 ॥

*bramhānanda-mīmāṁsā*

भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः ।
bhīṣhā (a)s'mād'vāta[fp]' pavatē । bhīṣhōdēti sūr'yaḥa ।



www.sriveda.net www.vedavishwa.com

भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम , इति ।
bhīṣhā (a)s'mādag'niśh'chēn'draśh'cha ।
mṛt'yur'dhāvati pañ'chama , iti ।

सैषाऽऽनन्दस्य मीमाꣳसा भवति । युवा स्यात्साधुयुवाऽध्यायकः ।
saiṣhā (ā)nan'das'ya mīmāgm'sā bhavati ।
yuvās' syāt'sādhuyuvā (a)dh'yāyakaḥa ।

आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् ।
āśhiṣh'ṭhō dṛḍhiṣh'ṭhō baliṣh'ṭhaḥa ।
tas'yēyam' pṛthivī sar'vā vit'tas'ya pūr'ṇās' syā-te ।

स , एको मानुष , आनन्दः । ते ये शतं मानुषा , आनन्दाः ॥
sa , ēkō mānuṣha , ānan'daḥa ।
tē yē śhatam' mānuṣhā , ānan'dā-ḥa ॥

स , एको मनुष्यगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य ।
sa , ēkō manuṣh'yagan'dhar'vāṇāmānan'daḥa ।
śhrōt'riyas'ya chākāmahatas'ya ।

ते ये शतं मनुष्यगन्धर्वाणामानन्दाः । स , एको देवगन्धर्वाणामानन्दः ।
tē yē śhatam' manuṣh'yagan'dhar'vāṇāmānan'dā-ḥa ।
sa , ēkō dēvagan'dhar'vāṇāmānan'daḥa ।

श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः ।
śhrōt'riyas'ya chākāmahatas'ya ।
tē yē śhatan' dēvagan'dhar'vāṇāmānan'dā-ḥa ।

www.vedamrita.net www.vedavishwa.com

स , एकः पितृणां चिरलोकलोकानां॑मान॒न्दः । श्रोत्रियस्य चाकाम॑हत॒स्य ।
sa , ēka[fp]’ pitṛṇāñ’ chiralōkalōkānāmānan’daḥa ।
śhrōt’riyas’ya chākāmahatas’ya ।

ते ये शतं पितृणां चिरलोकलोकानां॑मान॒न्दाः ।
स , एक , आजानजानां देवानां॑मान॒न्दः ।
tē yē śhatam’ pitṛṇāñ’ chiralōkalōkānāmānan’dā-ḥa ।
sa , ēka , ājānajānān’ dēvānāmānan’daḥa ॥

श्रोत्रियस्य चाकाम॑हत॒स्य । ते ये शतमाजानजानां देवानां॑मान॒न्दाः ।
śhrōt’riyas’ya chākāmahatas’ya ।
tē yē śhatamājānajānān’ dēvānāmānan’dā-ḥa ।

स , एकः कर्मदेवानां देवानां॑मान॒न्दः । ये कर्मणा देवान॑पिय॒न्ति ।
sa , ēka[hk]’ kar’madēvānān’ dēvānāmānan’daḥa ।
yē kar’maṇā dēvānapiyan’ti ।

श्रोत्रियस्य चाकाम॑हत॒स्य । ते ये शतं कर्मदेवानां देवानां॑मान॒न्दाः ।
śhrōt’riyas’ya chākāmahatas’ya ।
tē yē śhataṅ’ kar’madēvānān’ dēvānāmānan’dā-ḥa ।

स , एको देवानां॑मान॒न्दः । श्रोत्रियस्य चाकाम॑हत॒स्य ।
sa , ēkō dēvānāmānan’daḥa ।
śhrōt’riyas’ya chākāmahatas’ya ।

ते ये शतं देवानां॑मान॒न्दाः । स , एक , इन्द्र॑स्याऽऽन॒न्दः ।
tē yē śhatan’ dēvānāmānan’dā-ḥa ।
sa , ēka , in’dras’yā (ā)nan’daḥa ॥

www.saiveda.net www.vedavishwa.com

श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्याऽऽनन्दाः ।
śhrōt'riyas'ya chākāmahatas'ya ।
tē yē śhatamin'dras'yā (ā)nan'dā-ḥa ।

स , एको बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामहतस्य ।
sa , ēkō bṛhas'patērānan'daḥa ।
śhrōt'riyas'ya chākāmahatas'ya ।

ते ये शतं बृहस्पतेरानन्दाः । स , एकः प्रजापतेरानन्दः ।
tē yē śhatam' bṛhas'patērānan'dā-ḥa ।
sa , ēka[fp]' prajāpatērānan'daḥa ।

श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानन्दाः ।
śhrōt'riyas'ya chākāmahatas'ya ।
tē yē śhatam' prajāpatērānan'dā-ḥa ।

स , एको ब्रम्हणः , आनन्दः । श्रोत्रियस्य चाकामहतस्य ॥
sa , ēkōb' bram'haṇa , ānan'daḥa ।
śhrōt'riyas'ya chākāmahatas'ya ॥

स यश्चायं पुरुषे । यश्चासावादित्ये ।
sa yaśh'chāyam' puruṣhē । yaśh'chāsāvādit'yē ।

स , एकः । स य , एवंवित् । अस्माल्लोकात्प्रेत्य ।
sa , ēkaḥa । sa ya , ēvaṁ'vite । as'māl'lōkāt'prēt'ya ।

एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्रामति ।
ētaman'namayamāt'mānamupasaṅ'krāmati ।
ētam' prāṇamayamāt'mānamupasaṅ'krāmati ।



www.shivedavishwe.com

एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतमानन्दमयमात्मानमुपसंक्रामति । तदप्येष श्लोको भवति ॥ ८ ॥

ētam’ manōmayamāt’mānamupasaṅ’krāmati ।
ētaṁ’ vij’ñānamayamāt’mānamupasaṅ’krāmati ।
ētamānan’damayamāt’mānamupasaṅ’krāmati ।
tadap’yēṣhaśh’ śhlōkō bhavati ॥ 8 ॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह ।

yatō vāchō nivar’tan’tē । ap’rāāp’ya manasā saha ।

आनन्दं ब्रम्हणो विद्वान् । न बिभेति कुतश्चनेति ।

ānan’dam’ bram’haṇō vid’vā-ne ।
na bibhēti kutaśh’chanēti ।

एतꣳ ह वाव न तपति । किमहꣳ साधु नाकरवम् ।

ētagm’ ha vāva na tapati ।
kimahagm’ sādhu nākaravam ।

किमहं पापमकरवमिति । स य , एवं विद्वानेते , आत्मानꣳ स्पृणुते ।

kimaham’ pāpamakaravamiti ।
sa ya , ēvaṁ’ vid’vānētē , āt’mānag’ges’ spṛṇutē ।

उभे ह्येवैष , एते , आत्मानꣳ स्पृणुते ।
य , एवं वेद । इत्युपनिषत् ॥९॥ (सह नाववतु…)

ubhēh’ hyēvaiṣha , ētē , āt’mānag’ges’ spṛṇutē ।
ya , ēvaṁ’ vēda । it’yupaniṣhate ॥ 9 ॥ (saha nāvavatu…)

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.sanskritweb.net www.vedavishwa.com

[KYV TA 9]

*śhāntipāṭhaḥa*

ॐ स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वि॒र्यँ॑ करवावहै ।
ते॒ज॒स्वि॒ना॒वधी॑तमस्तु मा वि॑द्वि॒षाव॒हैँ॑ ॥

ॐ **saha nāvavatu | saha nau bhunak'tu |**
**saha vīr'yaṅ' karavāvahai |**
**tējas'vi nāvadhītamas'tu mā vid'viṣhāvahaiī |**

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥
ॐ **śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||**

*bramhajijñāsā*

भृगु॒र्वै वा॑रु॒णिः । वरु॑णं पि॒त॑र॒मुप॑ससार ।
अधी॑हि भगवो॒ ब्रम्हेति॑ । तस्मा॑ , ए॒तत्प्रो॑वाच ।

**bhṛgur'vai vāruṇiḥi | varuṇam' pitaramupasasāra |**
**adhīhi bhagavōb' bram'hēti | tas'mā , ētat'prōvācha |**

अन्नं॑ प्रा॒णं चक्षु॒श्श्रोत्रं॒ मनो॒ वाच॒मिति॑ । तꣳ हो॑वाच ।
**an'nam' prāṇañ' chak'shuśh'śhrōt'ram'**
**manō vāchamiti |**
**tagm' hōvācha |**

य॒तो॒ वा , इ॒मानि॒ भू॒ता॑नि॒ जाय॑न्ते । येन॒ जा॒ता॑नि॒ जीव॑न्ति ।
**yatō vā , imāni bhūtāni jāyan'tē | yēna jātāni jīvan'ti |**

www.sanskritdocuments... www.vedavishwa.com

यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व ।

yat'prayan'tyabhisaṁ'viśhan'ti । tad'vijij'ñāsas'va ।

तद्ब्रम्हेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ १ ॥

tad'bram'hēti । sa tapō (a)tap'yata । sa tapas'tap'tvā ॥ 1 ॥

*pañchakōśhāntas sthita-bramhanirūpaṇam*

अन्नं ब्रम्हेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते ।

an'nam' bram'hētiv' vyajānā-te ।

an'nād'dhyēva khal'vimāni bhūtāni jāyan'tē ।

अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति ।

an'nēna jātāni jīvan'ti ।

an'nam' prayan'tyabhisaṁ'viśhan'tīti ।

तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रम्हेति ।

tad'vij'ñāya । punarēva varuṇam' pitaramupasasāra ।

adhīhi bhagavōb' bram'hēti ।

तꣳ होवाच । तपसा ब्रम्ह विजिज्ञासस्व । तपो ब्रम्हेति ।

स तपोऽतप्यत । स तपस्तप्त्वा ॥ २ ॥

tagm' hōvācha । tapasāb' bram'ha vijij'ñāsas'va ।

tapōb' bram'hēti । sa tapō (a)tap'yata ।

sa tapas'tap'tvā ॥ 2 ॥

प्राणो ब्रम्हेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते ।

prāṇōb' bram'hētiv' vyajānā-te ।

prāṇād'dhyēva khal'vimāni bhūtāni jāyan'tē ।



www.vedavishwa.com

प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति ।

prāṇēna jātāni jīvan'ti |

prāṇam' prayan'tyabhisaṁ'viśhan'tīti |

तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार ।

tad'vij'ñāya | punarēva varuṇam' pitaramupasasāra |

अधीहि भगवो ब्रम्हेति । तꣳ होवाच ।

adhīhi bhagavōb' bram'hēti | tagm' hōvācha |

तपसा ब्रम्ह विजिज्ञासस्व । तपो ब्रम्हेति ।

tapasāb' bram'ha vijij'ñāsas'va | tapōb' bram'hēti |

स तपोऽतप्यत । स तपस्तप्त्वा ॥ ३ ॥

sa tapō (a)tap'yata | sa tapas'tap'tvā || 3 ||

मनो ब्रम्हेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते ।

manōb' bram'hētiv' vyajānā-te |

manasōh' hyēva khal'vimāni bhūtāni jāyan'tē |

मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति ।

manasā jātāni jīvan'ti |

mana[fp]' prayan'tyabhisaṁ'viśhan'tīti |

तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार ।

tad'vij'ñāya | punarēva varuṇam' pitaramupasasāra |

अधीहि भगवो ब्रम्हेति । तꣳ होवाच ।

adhīhi bhagavōb' bram'hēti | tagm' hōvācha |

तप॑सा॒ ब्रम्ह॒ विजि॑ज्ञासस्व । तपो॒ ब्रम्हेति॑ ।

tapasāb' bram'ha vijij'ñāsas'va | tapōb' bram'hēti |

स तपो॑ऽतप्यत । स तप॑स्त॒प्त्वा ॥ ४ ॥

sa tapō (a)tap'yata | sa tapas'tap'tvā || 4 ||

वि॒ज्ञा॒नं ब्रम्हेति॒ व्य॑जानात् । वि॒ज्ञाना॒द्ध्येव॑ खल्वि॒मानि॒ भूता॑नि॒ जाय॑न्ते ।

vij'ñānam' bram'hētiv' vyajānā-te |

vij'ñānād'dhyēva khal'vimāni bhūtāni jāyan'tē |

वि॒ज्ञाने॑न॒ जाता॑नि॒ जीव॑न्ति । वि॒ज्ञा॒नं प्रय॑न्त्य॒भिसंवि॑श॒न्तीति॑ ।

vij'ñānēna jātāni jīvan'ti |

vij'ñānam' prayan'tyabhisaṁ'viśhan'tīti |

तद्वि॒ज्ञाय॑ । पुन॑रे॒व वरु॑णं॒ पित॑र॒मुप॑ससार ।

अधी॑हि भगवो॒ ब्रम्हेति॑ । तꣳ हो॑वाच ।

tad'vij'ñāya | punarēva varuṇam' pitaramupasasāra |

adhīhi bhagavōb' bram'hēti | tagm' hōvācha |

तप॑सा॒ ब्रम्ह॒ विजि॑ज्ञासस्व । तपो॒ ब्रम्हेति॑ ।

स तपो॑ऽतप्यत । स तप॑स्त॒प्त्वा ॥ ५ ॥

tapasāb' bram'ha vijij'ñāsas'va | tapōb' bram'hēti |

sa tapō (a)tap'yata | sa tapas'tap'tvā || 5 ||

आ॒न॒न्दो ब्रम्हेति॒ व्य॑जानात् । आ॒न॒न्दा॒द्ध्येव॑ खल्वि॒मानि॒ भूता॑नि॒ जाय॑न्ते ।

ānan'dōb' bram'hētiv' vyajānā-te |

ānan'dād'dhyēva khal'vimāni bhūtāni jāyan'tē |

www.vedavishwa.com

आ॒न॒न्दे॒न॒ जाता॑नि॒ जीव॑न्ति । आ॒न॒न्दं प्रय॑न्त्य॒भिसंवि॑श॒न्तीति॑ ।
ānan’dēna jātāni jīvan’ti ।
ānan’dam’ prayan’tyabhisaṁ’viśhan’tīti ।

सैषा भा॑र्ग॒वी वा॑रु॒णी वि॒द्या । प॒र॒मे व्यो॑म॒न्प्रति॑ष्ठिता ।
saiṣhā bhāar’gavī vāruṇī vid’yā ।
paramēv’ vyōman’pratiṣh’ṭhitā ।

य , ए॒वं वे॒द॒ प्रति॑तिष्ठति । अन्न॑वानन्ना॒दो भ॑वति ।
ya , ēvaṁ’ vēdap’ pratitiṣh’ṭhati ।
an’navānan’nādō bhavati ।

म॒हान्भ॑वति प्र॒जया॑ प॒शुभि॑र्ब्र॒म्हव॒र्च॒सेन॑ । म॒हान्की॒र्त्या ॥ ६ ॥
mahān’bhavatip’ prajayā
pаśhubhir’bram’havar’chasēna ।
mahān’kīr’tyā ॥ 6 ॥

*anna-bramhōpāsanam*

अन्नं॒ न निन्द्यात् । तद्व्र॒तम् । प्रा॒णो वा , अन्न॑म् । शरी॑रमन्ना॒दम् ।
an’nan’ na nin’dyā-te । tad’vratam ।
prāṇō vā , an’nam’m । śharīraman’nādam ।

प्रा॒णे शरी॑रं॒ प्रति॑ष्ठितम् । शरी॑रे प्रा॒णः प्रति॑ष्ठितः ।
prāṇē śharīram’ pratiṣh’ṭhitam ।
śharīrēp’ prāṇa[fp]’ pratiṣh’ṭhitaḥ ।

तदेतदन्नमन्ने प्रतिष्ठितम् । स य , एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति ।

tadētadan’naman’nēp’ pratiṣh’ṭhitam ।
sa ya , ētadan’naman’nēp’
pratiṣh’ṭhitaṁ’ vēdap’ pratitiṣh’ṭhati ।

अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन ।
महान्कीर्त्या ॥७॥

an’navānan’nādō bhavati ।
mahān’bhavatip’ prajayā
paśhubhir’bram’havar’chasēna ।
mahān’kīr’tyā ॥ 7 ॥

अन्नं न परिचक्षीत । तद्व्रतम् । आपो वा, अन्नम् । ज्योतिरन्नादम् ।

an’nan’ na parichak’ṣhīta । tad’vratam ।
āpō vā , an’nam’m । jyōtiran’nādam ।

अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः ।

ap’suj’ jyōti[fp]’ pratiṣh’ṭhitam ।
jyōtiṣh’yāpa[fp]’ pratiṣh’ṭhitā-ḥa ।

तदेतदन्नमन्ने प्रतिष्ठितम् । स य , एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति ।
अन्नवानन्नादो भवति ।

tadētadan’naman’nēp’ pratiṣh’ṭhitam ।
sa ya , ētadan’naman’nēp’
pratiṣh’ṭhitaṁ’ vēdap’ pratitiṣh’ṭhati ।
an’navānan’nādō bhavati ।

www.saiveda.net
www.vedavishwa.com

महान्भ॑वति प्र॒जया॑ प॒शुभि॑र्ब्रह्मवर्च॒सेन॑ । म॒हान्कीर्त्या॑ ॥८॥

mahān'bhavatip' prajayā
pashubhir'bram'havar'chasēna ।
mahān'kīr'tyā ॥ 8 ॥

अन्नं॑ ब॒हु कु॑र्वीत । तद्व्र॒तम् । पृ॒थि॒वी वा॒ , अन्न॒म् । आ॒का॒शो॑ऽन्ना॒दः ।
an'nam' bahu kur'vīta । tad'vratam ।
pṛthivī vā , an'nam'm । ākāśhōō (a)n'nādaḥa ।

पृ॒थि॒व्यामा॑का॒शः प्रति॑ष्ठितः । आ॒का॒शे पृ॑थि॒वी प्रति॑ष्ठिता ।
pṛthiv'yāmākāśha[fp]' pratiṣh'ṭhitaḥa ।
ākāśhē pṛthivīp' pratiṣh'ṭhitā ।

तदे॒तद॒न्नमन्ने॒ प्रति॑ष्ठितम् । स य , ए॒तद॒न्नमन्ने॒ प्रति॑ष्ठितं॒ वेद॒ प्रति॑तिष्ठति ।
tadētadan'naman'nēp' pratiṣh'ṭhitam ।
sa ya , ētadan'naman'nēp'
pratiṣh'ṭhitaṁ' vēdap' pratitiṣh'ṭhati ।

अन्न॑वानन्ना॒दो भ॑वति । म॒हान्भ॑वति प्र॒जया॑ प॒शुभि॑र्ब्रह्मवर्च॒सेन॑ ।
म॒हान्कीर्त्या॑ ॥ ९ ॥
an'navānan'nādō bhavati ।
mahān'bhavatip' prajayā
pashubhir'bram'havar'chasēna ।
mahān'kīr'tyā ॥ 9 ॥

*sadāchāra-pradarśhanam / bramhānanda-anubhavaḥa*

न कंचन व॒सतौ॒ प्रत्या॑चक्षी॒त । तद्व्र॒तम् ।
na kañ'chana vasataup' prat'yāchak'shīta । tad'vratam ।



www.sanvedavishwa.com

तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात् ।
अराध्यस्मा , अन्नमित्याचक्षते ।

tas’mād’yayā kayā cha vidhayā
bah’van’nam’ prāp’nuyā-te ।
arādh’yas’mā , an’namit’yāchak’ṣhatē ।

एतद्वै मुखतोऽन्नꣳ राद्धम् । मुखतोऽस्मा , अन्नꣳ राध्यते ।
ētad’vai mukhatōō (a)n’nagm’ rād’dham ।
mukhatō (a)s’mā , an’nagm’ rādh’yatē ।

एतद्वै मध्यतोऽन्नꣳ राद्धम् । मध्यतोऽस्मा , अन्नꣳ राध्यते ।
ētad’vai madh’yatōō (a)n’nagm’ rād’dham ।
madh’yatō (a)s’mā , an’nagm’ rādh’yatē ।

एतद्वा , अन्ततोऽन्नꣳ राद्धम् । अन्ततोऽस्मा , अन्नꣳ राध्यते ।
ētad’vā , an’tatōō (a)n’nagm’ rād’dham ।
an’tatō (a)s’mā , an’nagm’ rādh’yatē ।

य , एवं वेद । क्षेम , इति वाचि । योगक्षेम , इति प्राणापानयोः ।
ya , ēvaṁ’ vēda । kṣhēma , iti vāchi ।
yōgak’ṣhēma , itip’ prāṇāpānayō-ḥo ।

कर्मेति हस्तयोः । गतिरिति पादयोः ।
विमुक्तिरिति पायौ । इति मानुषीस्समाज्ञाः ।
kar’mēti has’tayō-ḥo । gatiriti pādayō-ḥo ।
vimuk’tiriti pāyau । iti mānuṣhīis’samāj’ñā-ḥa ।

www.saiveda.net www.vedaviswa.com

अथ दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति । यश , इति पशुषु ।

atha daivī-ḥi I tṛp'tiriti vṛṣh'ṭau I

balamiti vid'yuti I yaśha , iti paśhuṣhu I

ज्योतिरिति नक्षत्रेषु । प्रजातिरमृतमानन्द , इत्युपस्थे ।

jyōtiriti nak'ṣhat'rēṣhu I

prajātiramṛtamānan'da , it'yupas'thē I

सर्वमित्याकाशे । तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान्भवति ।

तन्मह , इत्युपासीत । महान्भवति । तन्मन , इत्युपासीत ।

sar'vamit'yākāśhē I tat'pratiṣh'ṭhēt'yupāsīta I

pratiṣh'ṭhāvān'bhavati I tan'maha , it'yupāsīta I

mahān'bhavati I tan'mana , it'yupāsīta I

मानवान्भवति । तन्नम , इत्युपासीत ।

नम्यन्तेऽस्मै कामाः । तद्ब्रम्हेत्युपासीत ।

mānavān'bhavati I tan'nama , it'yupāsīta I

nam'yan'tēē (a)s'mai kāmā-ḥa I tad'bram'hēt'yupāsīta I

ब्रम्हवान्भवति । तद्ब्रम्हणः परिमर , इत्युपासीत ।

पर्येणं म्रियन्ते द्विषन्तस्सपत्नाः । परि येऽप्रिया भ्रातृव्याः ।

bram'havān'bhavati I

tad'bram'haṇa[fp]' parimara , it'yupāsīta I

par'yēṇam' mriyan'tēd'

dviṣhan'tas'sapat'nā-ḥa I

pari yēē (a)p'riyāāb' bhrātṛv'yā-ḥa I

स यश्चायं पुरुषे । यश्चासावादित्ये । स , एकः ।
स यं , एवं वित् । अस्माल्लोकात्प्रेत्य ।
sa yaśh'chāyam' puruṣhē I yaśh'chāsāvādit'yē I
sa , ēkaḥa I sa ya , ēvaṁ' vite I as'māl'lōkāt'prēt'ya I

एतमन्नमयमात्मानमुपसंक्रम्य । एतं प्राणमयमात्मानमुपसंक्रम्य ।
एतं मनोमयमात्मानमुपसंक्रम्य ।
ētaman'namayamāt'mānamupasaṅ'kram'ya I
ētam' prāṇamayamāt'mānamupasaṅ'kram'ya I
ētam' manōmayamāt'mānamupasaṅ'kram'ya I

एतं विज्ञानमयमात्मानमुपसंक्रम्य । एतमानन्दमयमात्मानमुपसंक्रम्य ।
ētaṁ' vij'ñānamayamāt'mānamupasaṅ'kram'ya I
ētamānan'damayamāt'mānamupasaṅ'kram'ya I

इमान्लोकान्कामान्नी कामरूप्यनुसंचरन्न् ।
एतत्साम गायन्नास्ते । हा ३ वु हा ३ वु हा ३ वु ।
imānl'lōkan'kāmān'nī kāmarūp'yanusañ'charan'ne I
ētat'sāma gāyan'nās'tē I hā3 , vu hā3 , vu hā3 , vu I

अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽ२हमन्नादोऽ२हमन्नादः ।
ahaman'namahaman'namahaman'nam I
ahaman'nādō3 , ōhaman'nādō3 , ōhaman'nādaḥa I

अहꣳ श्लोककृदहꣳ श्लोककृदहꣳ श्लोककृत् ।
ahag'geśh' śhlōkakṛdahag'geśh'
śhlōkakṛdahag'geśh' śhlōkakṛte I

अहमस्मि प्रथमजा , ऋता३स्य ।
ahamas'mip' prathamajā , ṛtā3 , sya I

पूर्वं देवेभ्यो , अमृतस्य ना३भायि । यो मा ददाति स , इदेव मा३वाः ।
pūr'van' dēvēbh'yō , amṛtas'ya nā3 , bhāāyi I
yō mā dadāti sa , idēva mā3 , vāāha I

अहमन्नमन्नमदन्तमा३द्मि । अहं विश्वं भुवनमभ्यभवाम् ।
ahaman'naman'namadan'tamā3 , dmi I
aham' viśh'vam' bhuvanamabh'yabhavām I

सुवर्न ज्योतीः । य , एवं वेद । इत्युपनिषत् ॥ १० ॥ (सह नाववतु...)
suvar'naj' jyōtīhi I ya , ēvam' vēda I
it'yupaniṣhate II 10 II (saha nāvavatu...)

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi II

## Sūryōpaniṣhat

[AV]

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
ॐ bhad'ran' kar'ṇēbhiśh' śhṛṇuyāma dēvā-ḥa I
bhad'ram' paśh'yēmāk'ṣhabhir'yajat'rā-ḥa I

स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
sthirairan'gais'tuṣh'ṭuvāgm'sas'tanūbhiḥi I
vyaśhēma dēvahitañ' yadāyuḥu I



www.vedavishwa.com

स्वस्ति न , इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
svas'ti na , in'drō vṛd'dhaśh'ravā-ḥa |
svas'ti na[fp]' pūṣhā viśh'vavēdā-ḥa |

स्वस्ति नस्ताक्ष्यों , अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
svas'ti nas'tārk'ṣhyō , ariṣh'ṭanēmiḥi |
svas'ti nō bṛhas'patir'dadhātu |

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

ॐ अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः । ब्रम्हा , ऋषिः ।
ॐ atha sūr'yāthar'vāṅ'girasaṁ' vyaākh'yās'yāmaḥa |
bram'hā , ṛṣhiḥi |

गायत्रीच्छन्दः । आदित्यो देवता ।
gāyat'rīt'chhan'daḥa | ādit'yō dēvatā |

हंसः सोऽहमग्निनारायण युक्तं बीजम् । हृल्लेखा शक्तिः ।
haṁ'sas' sō (a)hamag'ninārāyaṇa yuk'tam' bījam |
hṛl'lēkhā śhak'tiḥi |

वियदादिसर्गसंयुक्तं कीलकम् ।
चतुर्विधपुरुषार्थ सिद्ध्यर्थे विनियोगः ।
viyadādisar'gasañ'yuk'taṅ' kīlakam |
chatur'vidhapuruṣhār'tha
sid'dhyar'thē viniyōgaḥa |

षट्स्वरारूढेन बीजेन षडङ्गं रक्ताम्बुज संस्थितं सप्ताश्वरथिनं
हिरण्यवर्णं चतुर्भुजं पद्मद्वयाऽभय वरदहस्तं कालचक्रप्रणेतारं
श्री सूर्यनारायणं य , एवं वेद स वै ब्राम्हणः ॥

ṣhaṭ’svarārūḍhēna bījēna ṣhadaṅ’gaṁ’ rak’tām’buja
saṁ’sthitaṁ’ sap’tāśh’varathinaṁ’
hiraṇ’yavar’ṇañ’ chatur’bhujam’ pad’mad’vayā
(a)bhaya varadahas’taṅ’ kālachak’rap’raṇētāraṁ’
śhrī sūr’yanārāyaṇañ’ ya , ēvaṁ’ vēda
sa vaib’ braām’haṇaḥa ॥

ॐ भूर्भुवः सुवः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।

ॐ bhūr’bhuvas’ suvaḥa ।
tat’savitur’varēēṇ’yam’ bhar’gō dēvas’ya dhīmahi ।
dhiyō yō na[fp]’ prachōdayāāte ।

सूर्य , आत्मा जगतस्तस्थुषश्च । सूर्याद्वै खल्विमानि भूतानि जायन्ते ।
सूर्याद् यज्ञः पर्जन्योऽन्नमात्मा ।

sūr’ya , āt’mā jagatas’tas’thuṣhaśh’cha ।
sūr’yād’ vai khal’vimāni bhūtāni jāyan’tē ।
sūr’yāād’ yaj’ña[fp]’ par’jan’yōō (a)n’namāt’mā ।

नमस्ते , आदित्य । त्वमेव प्रत्यक्षं कर्म कर्ताऽसि ।

namas’tē , ādit’ya ।
tvamēvap’ prat’yak’ṣhaṅ’ kar’ma kar’tā (a)si ।

त्वमेव प्रत्यक्षं ब्रम्हाऽसि । त्वमेव प्रत्यक्षं विष्णुरसि ।

tvamēvap' prat'yak'ṣham' bram'hā (a)si ।

tvamēvap' prat'yak'ṣhaṁ' viṣh'ṇurasi ।

त्वमेव प्रत्यक्षं रुद्रोऽसि । त्वमेव प्रत्यक्षं , ऋगसि ।

tvamēvap' prat'yak'ṣhaṁ' rud'rō (a)si ।

tvamēvap' prat'yak'ṣhaṁ' , ṛgasi ।

त्वमेव प्रत्यक्षं यजुरसि । त्वमेव प्रत्यक्षं सामासि ।

tvamēvap' prat'yak'ṣhañ' yajurasi ।

tvamēvap' prat'yak'ṣhaṁ' sāmāsi ।

त्वमेव प्रत्यक्षमथर्वासि । त्वमेव सर्वं छन्दोऽसि ।

tvamēvap' prat'yak'ṣhamathar'vāsi ।

tvamēva sar'vañ' chhan'dō (a)si ।

आदित्याद् वायुर्जायते । आदित्याद् भूमिर्जायते ।

ādit'yād' vāyur'jāyatē । ādit'yād' bhūmir'jāyatē ।

आदित्यादापो जायन्ते । आदित्याज्योतिर्जायते ।

ādit'yādāpō jāyan'tē । ādit'yāj'jyōtir'jāyatē ।

आदित्याद् व्योम दिशो जायन्ते ।

ādit'yād' vyōma dishō jāyan'tē ।

आदित्याद् देवा जायन्ते । आदित्याद् वेदा जायन्ते ।

ādit'yād' dēvā jāyan'tē । ādit'yād' vēdā jāyan'tē ।

www.vaidika.net www.vedavishwa.com

आदित्यो वा , एष , एतन्मण्डलं तपति । असावादित्यो ब्रम्हा ।

ādit'yō vā , ēṣha , ētan'maṇ'ḍalan' tapati ।

asāvādit'yōb' bram'hā ।

आदित्योऽन्तःकरण मनोबुद्धि चित्ताहङ्कारा: ।

आदित्यो वै व्यानस्समानोदानोऽपानः प्राणः ।

ādit'yō (a)n'ta[hk]'karaṇamanōbud'dhi

chit'tāhaṅ'kārā-ḥa ।

ādit'yō vaiv'

vyānas'samānōdānō (a)pāna[fp]' prāṇaḥa ।

आदित्यो वै श्रोत्र त्वक् चक्षूरसनघ्राणाः ।

आदित्यो वै वाक्पाणिपादपायू पस्थाः ।

ādit'yō vaiśh' śhrōt'rat' tvak'

chak'ṣhūrasanagh'rāṇā-ḥa ।

ādit'yō vai vāk'pāṇipādapāyūpas'thā-ḥa ।

आदित्यो वै शब्दस्पर्शरूपरसगन्धाः ।

आदित्यो वै वचनादानागमन विसर्गानन्दाः ।

ādit'yō vai śhab'das'par'śharūparasagan'dhā-ḥa ।

ādit'yō vai vachanādānāgamana visar'gānan'dā-ḥa ।

आनन्दमयो विज्ञानमयो विज्ञानघनं , आदित्यः ।

ānan'damayō vij'ñānamayō vij'ñānaghana , ādit'yaḥa ।

www.saiveda.net
www.vedavishwa.com

नमो मित्राय भानवे मृत्योर्मा पाहि । भ्राजिष्णवे विश्वहेतवे नमः ।

namō mit’rāya bhānavē mṛt’yōōr’mā pāhi |

bhrājiṣh’ṇavē viśh’vahētavē namaḥa |

सूर्याद् भवन्ति भूतानि सूर्येण पालितानि तु ।
सूर्ये लयं प्राप्नुवन्ति यः सूर्यः सोऽहमेव च ।

sūr’yād’ bhavan’ti bhūtāni sūr’yēṇa pālitāni tu |

sūr’yē layam’ prāāp’nuvan’ti yas’

sūr’yas’ sō (a)hamēva cha |

चक्षुर्नो देवः सविता चक्षुर्न , उत पर्वतः । चक्षुर्धाता दधातु नः ।

chak’ṣhur’nō dēvas’ savitā

chak’ṣhur’na , uta par’vataḥa |

chak’ṣhur’dhātā dadhātu naḥa |

आदित्याय विद्महे सहस्रकिरणाय धीमहि । तन्नः सूर्यः प्रचोदयात् ।

ādit’yāya vid’mahē sahas’rakiraṇāya dhīmahi |

tan’nas’ sūr’ya[fp]’ prachōdayāāte |

सविता पश्चात्तात् सविता पुरस्तात् सवितोत्तरात्तात् सविताऽधरात्तात्
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ।

savitā paśh’chāt’tāāt’ savitā puras’tāāt’

savitōt’tarāt’tāāt’ savitā (a)dharāt’tāāt’

savitā nas’ suvatu sar’vatāātiṁ’

savitā nōō rāsatān’ dīr’ghamāyuḥu |

ओमित्येकाक्षरं ब्रम्ह । घृणिरिति द्वे , अक्षरें ।

ōmit'yēkāk'ṣharam' bram'ha ।

ghṛṇiritid' dvē , ak'ṣharēē ।

सूर्य , इत्यक्षरद्वयम् । आदित्य , इति त्रीण्यक्षराणि ।

sūr'ya , it'yak'ṣharad'vayam ।

ādit'ya , itit' trīṇ'yak'ṣharāṇi ।

एतस्यैव सूर्यस्याष्टाक्षरो मनुः ।

यः सदाहरहर्जपति स वै ब्राम्हणो भवति स वै ब्राम्हणो भवति ।

ētas'yaiva sūr'yas'yāṣh'ṭāk'ṣharō manuḥu ।

yas' sadāharahar'japati sa vaib' brām'haṇō bhavati

sa vaib' brām'haṇō bhavati ।

सूर्याभिमुखो जप्त्वा महाव्याधि भयात् प्रमुच्यते । अलक्ष्मीर्नश्यति ।

sūr'yābhimukhō jap'tvā

mahāv'yādhi bhayāāt' pramuch'yatē ।

alak'ṣhmīr'naśh'yati ।

अभक्ष्य भक्षणात् पूतो भवति । अगम्यागमनात् पूतो भवति ।

abhak'ṣhya bhak'ṣhaṇāt' pūtō bhavati ।

agam'yāgamanāt' pūtō bhavati ।

पतित सम्भाषणात् पूतो भवति । असत् सम्भाषणात् पूतो भवति ।

patita sam'bhāṣhaṇāt' pūtō bhavati ।

asat' sam'bhāṣhaṇāt' pūtō bhavati ।

www.sanskritdocuments.org www.vedavishwa.com

मध्यान्हे सूर्याभिमुखः पठेत् । सद्योत्पन्नपञ्चमहापातकात् प्रमुच्यते ।

madh'yān'hē sūr'yābhimukha[fp]' paṭhē-te |

sad'yōt'pan'napañ'chamahāpātakāāt'

pramuch'yatē |

सैषा सावित्रीं विद्यां न किञ्चिदपि न कस्मैचित् प्रशंसयेत् ।

य , एतां महाभागः प्रातः पठति स भाग्यवान् जायते पशूंन्विन्दति ।

saiṣhā sāvit'rīṁ' vid'yān' na kiñ'chidapi na

kas'maichit' praśhaṁ'sayē-te |

ya , ētām' mahābhāga[fp]' prāta[fp]' paṭhati

sa bhāg'yavān' jāyatē paśhūn'vin'dati |

वेदार्थं लभते । त्रिकालमेतज्जप्त्वा क्रतुशतफलमवाप्नोति ।

vēdāār'thaṁ' labhatē |

trikālamētaj'jap'tvāk' kratuśhataphalamavāp'nōti |

हस्तादित्ये जपति स महामृत्युं तरति स महामृत्युं तरति य , एवं वेद ।

इत्युपनिषत् ॥

has'tādit'yē japati sa mahāmṛt'yun' tarati

sa mahāmṛt'yun' tarati ya , ēvaṁ' vēda |

it'yupaniṣhate ||

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

## Bhū Sūktam

[(1) KYV TS 1-5-3-1 to 1-5-3-7
(2) Mantra Pușhpam (*Ramakrishna Mission*)
(3) KYV TB 3-1-2-6]

ॐ भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा । द्यौर्वरिणाऽन्तरिक्षं महित्वा ।
उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायाऽऽदधे ॥

ॐ bhūmir'bhūm'nād'
dyaur'variṇā (a)n'tarik'ṣham' mahit'vā ।
upas'thē tē dēv'yaditē
(a)g'niman'nādaman'nād'yāyā (ā)dadhē ॥

आऽयं गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरं च प्रयन्त्सुवः ॥

ā (a)yaṅ' gau[fp]'
pṛśh'nirak'ramīdasanan'mātaram' punaḥa ।
pitarañ' chap' prayant'suvaḥa ॥

त्रिꣳशद्धाम वि राजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः ॥

trigm'śhad'dhāma vi rājati vāk'pataṅ'gāya śhiśh'riyē ।
prat'yas'ya vahad' dyubhiḥi ॥

अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन् महिषः सुवः ॥

as'yap' prāṇādapānat'yan'taśh'charati rōchanā ।
vyakh'yan' mahiṣhas' suvaḥa ॥

यत् त्वा क्रुद्धः परोवप मन्युना यदवर्त्या ।

yat' tvāk' krud'dha[fp]'
parōvapa man'yunā yadavar'tyā ।



www.vedavishwa.com

सुकल्पमग्ने तत् तव पुनस्त्वोद्दीपयामसि ॥

sukal'pamag'nē tat' tava punas'tvōd'dīpayāmasi ||

यत् ते मन्युपरोप्तस्य पृथिवीमनु दध्वसे ।

yat' tē man'yuparōp'tas'ya pṛthivīmanu dadh'vasē |

आदित्या विश्वे तद्देवा वसवश्च समाभरन् ॥

ādit'yā viśh'vē tad'dēvā vasavaśh'cha samābharan'ne ||

मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु ।

manōj' jyōtir'juṣhatāmāj'yaṁ' vit'chhin'nañ'
yaj'ñagm' samiman' dadhātu |

बृहस्पतिस्तनुतामिमं नो विश्वे देवा , इह मादयन्ताम् ॥

bṛhas'patis'tanutāmiman' nō viśh'vē dēvā ,
iha mādayan'tām || (1)

मेदिनी देवी वसुन्धरा स्याद् वसुधा देवी वासवी ।

mēdinī dēvī vasun'dharās' syād'
vasudhā dēvī vāsavī |

ब्रम्हवर्चसः पितृणाꣳ श्रोत्रं चक्षुर्मनः ।

bram'havar'chasa[fp]' pitṛṇāgeśh' śhrōt'rañ'
chak'shur'manaḥa |

देवी हिरण्यगर्भिणी देवी प्रसूवरी ।

dēvī hiraṇ'yagar'bhiṇī dēvīp' prasūvarī |

www.sanskritwa.com

सदने सत्यायने सीद ॥

sadanē sat’yāyanē sīda ॥

समुद्रवती सावित्रीह नो देवी मह्यङ्गी ।

samud’ravatī sāvit’rīha nō dēvī mah’yaṅ’gī ।

महीधरणी महोव्यथिष्ठाः शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषिणी ।

mahīdharaṇī mahōv’yathiṣh’ṭhāśh’ śhṛṅ’gē śhṛṅ’gē
yaj’ñē yaj’ñē vibhīṣhiṇī ।

इन्द्रपत्नी व्यापिनी सुरसरिदिह ।

in’drapat’nīv’ vyāpinī surasaridiha ।

वायुमती जलशयनी श्रियं धाराजा सत्यन्धो परिमेदिनी ।

vāyumatī jalaśhayanīśh’ śhriyan’ dhārājā
sat’yan’dhō parimēdinī ।

श्वोपरि धत्तं परि गाय ॥

śhvōpari dhat’tam’ pari gāya ॥

विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् ।

viṣh’ṇupat’nīm’ mahīn’ dēvīm’
mādhavīm’ mādhavap’riyām ।

लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत वल्लभाम् ॥

lak’ṣhmīm’ priyasakhīn’ dēvīn’
namām’yat’chyuta val’labhām ॥

www.vedavishwa.com

धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि ।

dhanur’dharāyai vid’mahē
sar’vasid’dhyai cha dhīmahi ।

तन्नो धरा प्रचोदयात् ॥

tan’nō dharāp’ prachōdayāāte ॥ (2)

महीं देवीं विष्णुपत्नीमजूर्याम् ।

mahīn’ dēvīṁ’ viṣh’ṇupat’nīmajūr’yām ।

प्रतीचीमेनाꣳ हविषा यजामः ।

pratīchīmēnāgm’ haviṣhā yajāmaḥa ।

त्रेधा विष्णुरुरुगायो विचक्रमे ।

trēdhā viṣh’ṇururugāyō vichak’ramē ।

महीं दिवं पृथिवीमन्तरिक्षम् ।

mahīn’ divam’ pṛthivīman’tarik’ṣham ।

तच्छ्रोणैति श्रव , इच्छमाना ।

tat’chhrōṇaitiśh’ śhrava , it’chhamānā ।

पुण्यꣳ श्लोकं यजमानाय कृण्वती ।

puṇ’yag’geśh’ śhlōkañ’ yajamānāya kṛṇ’vatī । (3)

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.sanskritweb.net www.vedavishwa.com

## Nīḻā Sūktam

[KYV – TS 4-4-12-5]

ॐ नी॒ळा॒दे॒वीग्ं॑ शर॑णम॒हं प्रप॑द्ये सु॒तर॑सि त॒रसे॒ नम॑: । गृ॒णा॒हि॒ ।

ॐ nīḻādēvīgm' śharaṇamaham' prapad'yē sutarasi tarasē namaḥa ।

gṛṇāāhi ।

घृ॒तव॑ती सवितराधि॑पत्यै॒: पय॑स्वती॒ रन्ति॒राशा॑ नो , अस्तु ।

ध्रु॒वा दि॒शां विष्णु॑पत्न्यघो॑राऽस्येशा॑ना॒ सह॑सो॒ या म॒नोता॑ ।

ghṛtavatī savitarādhipat'yai[fp]' payas'vatī ran'tirāśhā nō , as'tu ।

dhruvā diśhāṁ' viṣh'ṇupat'nyaghōrā (a)s'yēśhānā sahasō yā manōtāā ।

बृ॒ह॒स्पति॑र्मा॒त॒रिश्वो॒त वा॒युः स॑न्धु॒वा॒ना वाता॑ , अ॒भि नो॑ गृणन्तु ।

वि॒ष्ट॒म्भो॒ दि॒वो ध॒रुण॑: पृथि॒व्या , अ॒स्येशा॑ना॒ जग॑तो॒ विष्णु॑पत्नी ।

bṛhas'patir'mātariśh'vōta vāyus' san'dhuvānā vātā , abhi nō gṛṇan'tu ।

viṣh'ṭam'bhō divō dharuṇa[fp]' pṛthiv'yā , as'yēśhānā jagatō viṣh'ṇupat'nī ।

वि॒श्वव्य॑चा , इ॒षय॑न्ती॒ सुभू॑तिः शि॒वा नो॑ , अ॒स्त्वदि॑तिरु॒पस्थे॑ ।

viśh'vav'yachā , iṣhayan'tī subhūtiśh' śhivā nō , ast'vaditirupas'thēē ।

ॐ शान्ति॒: शान्ति॒: शान्ति॑: ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.saiveda.net www.vedavishwa.com

# Dēvī Sūktam

## Vāgāmbhṛṇī Sūktam

[RV S 10-125 – Kāñchī Pāṭhaḥa]

ॐ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी , अहमश्विनोभा ॥ १ ॥

ॐ aham' rud'rēbhir'vasu-bhiś'
charām'yahamāādit'yairuta viś'vadēēvai-ḥi ।
aham' mit'rāvaru-ṇōbhā bi-bhar'myahamin'n'drāg'nī ,
ahamaś'vinōbhā ॥ 1 ॥

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्येऽ यजमानाय सुन्वते ॥ २ ॥

aham' sōma-māhanasam'm' bibhar'myahan'
tvaṣh'ṭāāramuta pūṣhaṇam' bhagam'm ।
ahan' da-dhāmid' dravi-ṇam' haviṣh'ma-tē
sup'rāv'yēēēēē , ē- yaja-mānāya sun'vatē ॥ 2 ॥

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥ ३ ॥

aham' rāṣh'ṭrīī saṅ'gama-nī vasūūnāñ'
chikituṣhīīp' prathamā yaj'ñiyāānām ।
tām' māā dēvāv' vya-dadhu[fp]' purut'rā
bhūris'thāt'rām' bhūr'yāāvēśhayan'n'tīm ॥ 3 ॥

www.vedarishwa.com

मया सो , अन्नमत्ति यो विपश्यति यः प्राणिति य , ईं शृणोत्युक्तम् ।
अमन्तवो मां त , उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं तेँ वदामि ॥४॥

mayā sō , an’na-mat’ti yō vipaśh’ya-ti
yā[fp]’ prāṇi-ti ya , īīṁ’ śhṛṇōt’yuk’tam ।
aman’tavō mān’ ta , upak’ kṣhiyan’tiśh’ śhrudhiśh’
śhru-taśh’ śhrad’dhivan’ tēē vadāmi ॥ 4 ॥

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तन्तमुग्रं कृणोमि तं ब्रम्हाणं तमृषिं तं सुमेधाम् ॥५॥

ahamēvas’ svayamidaṁ’ va-dāmi juṣh’ṭan’n’
dēvēbhi-ruta mānu-ṣhēbhiḥi ।
yaṅ’ kāmayē tan’ta-mug’raṅ’ kṛ-ṇōmi tam’
bram’hāṇan’ tamṛṣhin’ taṁ’ su-mēdhām ॥ 5 ॥

अहं रुद्राय धनुरा तनोमि ब्रम्हद्विषे शरवे हन्तवा , उं ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी , आ विवेश ॥६॥

ahaṁ’ rud’rāya dhanurā ta-nōmib’
bram’had’viṣhē śhara-vē han’tavā , u- ।
ahañ’ janāāya samadaṅ’ṅ’
kṛṇōm’yahan’ dyāvāāpṛthivī , ā vi-vēśha ॥ 6 ॥

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्व१न्तः समुद्रे ।

ahaṁ’ su-vē pitara-mas’ya mūr’dhan’mama
yōni-rap’svaa- , an’tas’ sa-mud’rē ।

त॒तो वि ति॑ष्ठे॒ भुव॒नानु॒ विश्वो॒तामूं द्यां व॒र्ष्मणोप॑ स्पृशामि ॥७॥

tatō vi tiṣh’ṭhē bhuvanānu viśh’vō tāmūn’
dyāṁ’ var’ṣhmaṇōpas’ spṛśhāmi ॥ 7 ॥

अ॒हमे॒व वात॑-इव॒ प्र वा॒॑म्या॒रभ॑माणा॒ भुव॑नानि॒ विश्वा॑।
प॒रो दि॒वा प॒र , ए॒ना पृ॑थि॒व्यैताव॑ती महि॒ना सं ब॑भूव ॥८॥

ahamēva vāta- , ivap’ pra
vāām’yārabha-māṇā bhuva-nāni viśh’vāā ।
parō divā para , ēnā pṛ-thiv’yaitāva-tī
mahinā sam’ ba-bhūva ॥ 8 ॥

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

## Śhrī Sūktam

[RV Khila (pariśhiṣhṭa bhāga)]

ॐ हिर॑ण्यवर्णां॒ हरि॑णीं सु॒वर्ण॑ रज॒तस्र॑जाम् ।
च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ , आ व॑ह ॥१॥

ॐ hiraṇ’yavar’ṇāṁ’ hariṇīṁ’ suvar’ṇa rajatas’rajām ।
chan’drāṁ’ hiraṇ’mayīṁ’ lak’ṣhmīñ’
jātavēdō ma , ā vaha ॥ 1 ॥

तां म॒ , आ व॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी॓म् ।
यस्यां॒ हिर॑ण्यं वि॒न्देयं॒ गामश्वं॒ पुरु॑षान॒हम् ॥२॥

tām’ ma , ā vaha jātavēdō lak’ṣhmīmanapagāminīīm ।
yas’yāṁ’ hiraṇ’yaṁ’ vin’dēyaṅ’
gāmaśh’vam’ puruṣhānaham ॥ 2 ॥

www.salveda.net www.vedavishwa.com

अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम् ।
श्रियं देवीमुप ह्वये श्रीर्मा देवीर्जुषताम् ॥ ३ ॥

aśh’vapūr’vāṁ’ rathamadh’yāṁ’
has’tināādap’ prabōdhinīm ।
śhriyan’ dēvīmupah’ hvayēśh’
śhrīr’māā dēvīr’juṣhatām ॥ 3 ॥

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोप ह्वये श्रियम् ॥ ४ ॥

kāṁ’ sōōs’mitāṁ’ hiraṇ’yap’rākārāmār’drāñ’
jvalan’tīn’ tṛp’tān’ tar’payan’tīm ।
pad’mēs’thitām’ pad’mavar’ṇān’
tāmihōpah’ hvayēśh’ śhriyam ॥ 4 ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्र पद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥

chan’drām’ prabhāsāñ’ yaśhasāj’ jvalan’tīṁ’
śhriyaṁ’ lōkē dēvajuṣh’ṭāmudārām ।
tām’ pad’minīmīṁ’ śharaṇamaham’ pra pad’yē
(a)lak’ṣhmīr’mē naśh’yatān’ tvāṁ’ vṛṇē ॥ 5 ॥

आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।

ādit’yavar’ṇē tapasō (a)dhi jātō
vanas’patis’tava vṛk’ṣhō (a)tha bil’vaḥa ।

त॒स्य॒ फला॑नि॒ तप॒सा नु॑दन्तु मा॒ यान्त॑रा॒याश्च॑ बा॒ह्या , अ॑ल॒क्ष्मीः ॥६॥

tas’ya phalāāni tapasā nudan’tu mā
yān’tarāyāśh’cha bāh’yā , alak’ṣhmī-ḥi ॥ 6 ॥

उपै॑तु॒ मां दे॑वस॒खः की॒र्तिश्च॒ मणि॑ना स॒ह ।
प्रा॒दु॒र्भू॒तोऽस्मि॑ रा॒ष्ट्रेऽस्मिन् की॒र्तिमृ॑द्धिं द॒दातु॑ मे ॥७॥

upaitu mān’ dēvasakha[hk]’ kīr’tiśh’cha maṇinā saha ।
prādur’bhūtō (a)s’mi rāṣh’ṭrē (a)s’min’
kīr’timṛd’dhin’ dadātu mē ॥ 7 ॥

क्षु॒त्पि॑पा॒साम॑लां॒ ज्ये॒ष्ठाम॑ल॒क्ष्मीं ना॑शया॒म्यहम् ।
अभू॑ति॒मस॑मृ॒द्धिं च॒ सर्वां॒ निर्णु॑द मे॒ गृहा॑त् ॥८॥

kṣhut’pipāsāmalāñ’ jyēṣh’ṭhāmalak’ṣhmīn’
nāśhayām’yaham ।
abhūtimasamṛd’dhiñ’ cha sar’vān’
nir’ṇuda mē gṛhāāte ॥ 8 ॥

ग॒न्ध॒द्वा॒रां दु॑रा॒ध॒र्षां॒ नि॒त्यपु॑ष्टां करी॒षिणी॑म् ।
ई॒श्वरीं॑ सर्व॑भूता॒नां॒ ता॒मि॒होप॑ ह्वये॒ श्रियम् ॥९॥

gan’dhad’vārān’ durādhar’ṣhān’
nit’yapuṣh’ṭān’ karīṣhiṇīīm ।
īśh’varīgm’ sar’vabhūtānān’
tāmihōpah’ hvayēśh’ śhriyam ॥ 9 ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥

manasa[hk]' kāmamākūūtiṁ'
vāchas' sat'yamaśhīmahi |
paśhūnāṁ' rūpaman'nas'ya mayiśh'
śhrīśh' śhrayatāñ' yaśhaḥa || 10 ||

कर्दमेन प्रजा भूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥

kar'damēnap' prajā bhūtāā mayisam'bhava kar'dama |
śhriyaṁ' vāsaya mē kulē
mātaram' pad'mamālinīm || 11 ||

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥

āpas' sṛjan'tus' snig'dhāni chik'līta vasa mē gṛhē |
ni cha dēvīm' mātaraṁ' śhriyaṁ' vāsaya mē kulē || 12 ||

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म , आ वह ॥ १३ ॥

ār'drām' push'kariṇīm'
push'ṭim' piṅ'galām' pad'mamālinīm |
chan'draṁ' hiraṇ'mayīṁ' lak'ṣhmīñ'
jātavēdō ma , ā vaha || 13 ||

आ॒र्द्रां य॒ःकरि॑णीं य॒ष्टिं सु॒व॒र्णां हे॑ममा॒लिनी॑म् ।
सू॒र्यां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ , आ व॑ह ॥ १४ ॥

ār’drāñ’ ya[hk]’kariṇīñ’ yaṣh’ṭiṁ’
suvar’ṇāṁ’ hēmamālinīm ।
sūr’yāṁ’ hiraṇ’mayīṁ’ lak’ṣhmīñ’
jātavēdō ma , ā vaha ॥ 14 ॥

तां म॒ , आ व॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी॑म् ।
यस्यां॒ हिर॑ण्यं॒ प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वा॑न् वि॒न्देयं॒ पुरु॑षान॒हम् ॥ १५ ॥

tām’ ma , ā vaha jātavēdō lak’ṣhmīmanapagāminīim ।
yas’yāṁ’ hiraṇ’yam’ prabhūtaṅ’ gāvō dās’yō
(a)śh’vāān’ vin’dēyam’ puruṣhānaham ॥ 15 ॥

यः शु॒चिः प्र॒यतो॑ भू॒त्वा जु॒हुया॑दा॒ज्य॒ मन्व॑हम् ।
श्रिय॑ः प॒ञ्चद॑शर्चं॒ च श्री॒काम॑ः स॒ततं॒ ज॑पेत् ॥ १६ ॥

yaśh’ śhuchi[fp]’ prayatō bhūt’vā
juhuyāādāj’ya man’vaham ।
śhriya[fp]’ pañ’chadaśhar’chañ’
chaśh’ śhrīkāmas’ satatañ’ japē-te ॥ 16 ॥

प॒द्मान॒ने प॑द्म , ऊ॒रू प॒द्माक्षी॑ प॒द्मसम्भ॑वे ।
त्वं मा॑ भ॒जस्व॑ प॒द्माक्षी॒ ये॒न सौ॑ख्यं ल॒भाम्य॑हम् ॥

pad’mānanē pad’ma ,
ūrū pad’māk’ṣhī pad’masam’bhavē ।
tvam’ māam’ bhajas’va pad’māk’ṣhī
yēna sauūkh’yaṁ’ labhām’yaham ॥

www.saiveda.net
www.vedavishwa.com

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥
aśh'vadāyī gōdāyī dhanadāyī mahādhanē ।
dhanam' mē juṣhatān' dēvi
sar'vakāmāṁśh'cha dēhi mē ॥

पुत्रपौत्र धनं धान्यं हस्त्यश्वादिगवे रथम् ।
प्रजानां भवसि माता , आयुष्मन्तं करोतु माम् ॥
put'rapaut'ra dhanan' dhān'yaṁ'
has'tyaśh'vādigavē ratham ।
prajānām' bhavasi mātā ,
āyuṣh'man'taṅ' karōtu mām ॥

धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्नु ते ॥
dhanamag'nir'dhanaṁ' vāyur'dhanaṁ'
sūr'yō dhanaṁ' vasuḥu ।
dhanamin'drō bṛhas'patir'varuṇan' dhanamaśh'nu tē ॥

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥
vainatēya sōmam' piba sōmam' pibatu vṛt'rahā ।
sōman' dhanas'ya sōminō
mah'yan' dadātu sōminaḥa ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा ॥

nak’ krōdhō na cha māt’sar’yan’
    na lōbhō nāśhubhā matiḥi ।
bhavan’ti kṛtapuṇ’yānām’
    bhak’tānāṁ’ śhrīsūūk’tañ’ japēt’sadā ॥

वर्षन्तु ते विभावरि दिवो , अभ्रस्य विद्युतः ।
रोहन्तु सर्वबीजान्यव ब्रम्ह द्विषो जहि ॥

var’ṣhan’tu tē vibhāvari divō , abh’ras’ya vid’yutaḥa ।
rōhan’tu sar’vabījān’yavab’ bram’had’ dviṣhō jahi ॥

पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विष्णु मनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥

pad’map’riyē pad’mini pad’mahas’tē
    pad’mālayē pad’madalāyatāk’ṣhi ।
viśh’vap’riyē viṣh’ṇu manō (a)nukūlēt’
    tvat’pādapad’mam’ mayi san’nidhat’sva ॥

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी ।
गम्भीरा वर्तनाभिः स्तनभर नमिता शुभ्र वस्त्रोत्तरीया ।

yā sā pad’māsanas’thā vipulakaṭitaṭī
    pad’mapat’rāyatāk’ṣhī ।
gam’bhīrā var’tanābhis’ stanabhara namitā
    śhubh’ra vas’trōt’tarīyā ।

लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगण खचितैस्स्नापिता हेमकुम्भैः ।
नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

lak'ṣhmīr'div'yair'gajēn'drair'maṇigaṇa
khachitais'snāpitā hēmakum'bhai-ḥi ।
nit'yaṁ' sā pad'mahas'tā mama vasatu gṛhē
sar'vamāṅ'gal'yayuk'tā ॥

लक्ष्मीं क्षीरसमुद्र राजतनयां श्रीरंगधामेश्वरीम् ।
दासीभूतसमस्त देव वनितां लोकैक दीपांकुराम् ।

lak'ṣhmīṁ' kṣhīrasamud'ra rājatanayāṁ'
śhrīraṅ'gadhāmēśh'varīm ।
dāsībhūtasamas'ta dēva vanitāṁ'
lōkaika dīpāṅ'kurām ।

श्रीमन्मन्दकटाक्षलब्ध विभव ब्रम्हेन्द्रगङ्गाधराम् ।
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥

śhrīman'man'dakaṭāk'ṣhalab'dha vibhavab'
bram'hēn'dragaṅ'gādharām ।
tvāṅ' trailōk'ya kuṭum'binīṁ' sarasijāṁ'
van'dē mukun'dap'riyām ॥

सिद्धलक्ष्मीर्मोक्षलक्ष्मीर् जयलक्ष्मीस्सरस्वती ।
श्रीलक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा ॥

sid'dhalak'ṣhmīr'mōk'ṣhalak'ṣhmīr'
jayalak'ṣhmīs'saras'vatī ।
śhrīlak'ṣhmīr'varalak'ṣhmīśh'chap'
prasan'nā mama sar'vadā ॥

www.sairamvedavishwa.com

वरांकुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् ।
बालार्क कोटि प्रतिभां त्रिनेत्रां भजेहमाद्यां जगदीश्वरीं ताम् ॥

varāṅ'kuśhau pāśhamabhītimud'rāṅ'
karair'vahan'tīṅ' kamalāsanas'thām |
bālār'ka kōṭip' pratibhān' trinēt'rām'
bhajēhamād'yāñ' jagadīśh'varīn' tām ||

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥

sar'vamaṅ'galamāṅ'gal'yē śhivē sar'vār'tha sādhikē |
śharaṇ'yēt' tryam'bakē dēvi nārāyaṇi namō (a)s'tu tē ||

नारायणि नमोऽस्तु ते । नारायणि नमोऽस्तु ते ॥

nārāyaṇi namō (a)s'tu tē | nārāyaṇi namō (a)s'tu tē ||

सरसिजनिलये सरोजहस्ते धवलतरांशुक गन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरिप्रसीद मह्यम् ॥

sarasijanilayē sarōjahas'tē dhavalatarāṁ'śhuka
gan'dhamāāl'yaśhōbhē |
bhagavati harival'labhē manōj'ñēt'
tribhuvanabhūtikarip'rasīda mah'yam ||

विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।

viṣh'ṇupat'nīṅ' kṣhamān' dēvīm' mādhavīīm'
mādhavap'riyām |

www.sriyedavishwa.com

विष्णोः प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥

viṣh'ṇōō[fp]' priyasakhīn' dēvīn'
namām'yach'yutaval'labhām ||

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥

mahālak'ṣhmī cha vid'mahē
viṣh'ṇupat'nī cha dhīmahi |
tan'nō lak'ṣhmī[fp]' prachōdayāāte ||

श्रीवर्चस्यमायुष्यमारोग्यमाविधात् पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

śhrīvar'chas'yamāyuṣh'yamārōōg'yamāvidhāt'
pavamānam' mahīyatēē |
dhanan' dhān'yam' paśhum' bahuput'ralābhaṁ'
śhatasaṁ'vat'saran' dīr'ghamāyuḥu ||

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

## Gaṇapati Sūktam

[(1) RV S 8-81-1 to 9 (2) RV S 2-23-1 (3) RV S 10-112-9&10 (Śhṛṅgērī Pāṭhaḥa)]

ॐ आ तू न , इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।
महाहस्ती दक्षिणेन ॥ १ ॥

ॐ ā tū na , in'drak' kṣhuman'tañ'ñ'
chit'raṁ' grābhaṁ' saṁ' gṛbhāya |
mahāhas'tī dak'ṣhiṇēna || 1 ||



www.stivedavishwa.com

विद्मा हि त्वाँ तुविकूर्मिं तुविदेँष्णं तुवीमंघम् । तुविमात्रमवोँभिः ॥२॥

vid’mā hit’ tvāā tuvikūr’min’

tuvidēēṣh’ṇan’ tuvīmagham ।

tuvimāt’ramavōōbhiḥi ॥ 2 ॥

नहि त्वाँ शूर देवा न मर्ताँसो दित्सन्ँतम् । भीमं न गां वारयन्ँते ॥३॥

nahit’ tvāā śhūra dēvā na mar’tāāsō dit’san’n’tam ।

bhīman’ na gāṁ’ vārayan’n’tē ॥ 3 ॥

एतोन्विन्द्रं स्तवामेशाँनं वस्वः स्वराजमँ । न राधसा मर्धिषन्नः ॥४॥

ētōn’vin’draṁ’ stavāmēśhāānaṁ’ vas’vas’ svarājam’m ।

na rādhasā mar’dhiṣhan’naḥa ॥ 4 ॥

प्रस्तोँषदुपं गासिषच्छ्रवत्सामं गीयमाँनम् । अभि राधसा जुगुरत् ॥५॥

pras’stōōṣhadupa

gāsiṣhat’chhravat’sāma gīyamāānam ।

abhi rādhasā jugurate ॥ 5 ॥

आ नोँ भर दक्षिणेनाऽभि सव्येन प्रमृश । इन्द्र मा नो वसोर्निर्भाँक् ॥६॥

ā nōō bhara dak’ṣhiṇēnā (a)bhi sav’yēnap’ pramṛśha ।

in’dra mā nō vasōr’nir’bhāāke ॥ 6 ॥

उपं क्रमस्वा भंर धृषता धृष्णो जनाँनाम् । अदाँशूष्टरस्य वेदः ॥७॥

upak’ kramas’vā bhara dhṛṣhatā dhṛṣh’ṇō janāānām ।

adāāśhūṣh’ṭaras’ya vēda-ḥa ॥ 7 ॥



www.saiveda.net www.vedavishwa.com

इन्द्र य , उ नु ते , अस्ति वाजो विप्रेभिः सनित्वः ।
अस्माभिः सु तं सनुहि ॥८॥

in'dra ya , u nu tē , as'ti vājō vip'rēēbhis' sanit'vaḥa ।
as'mābhis' su taṁ' sanuhi ॥ 8 ॥

सद्योजुवस्ते वाजा , अस्मभ्यं विश्वश्चन्द्राः । वशैश्च मक्षू जरन्ते ॥९॥

sad'yōjuvas'tē vājaā ,
as'mabh'yaṁ'ṁ' viśh'vaśh'chan'n'drā-ḥa ।
vaśhaiīśh'cha mak'ṣhū jaran'tē ॥ 9 ॥ (1)

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रम्हणां ब्रम्हणस्पत ,
आ नः शृण्वन्नूतिभिः सीद सादनम् ॥१०॥

gaṇānāān' tvā gaṇapatiṁ' havāmahē
kaviṅ' kavīnāmupamaśh'ravas'tamam ।
jyēēṣh'ṭha rājam' bram'haṇām' bram'haṇas'pata , ā
naśh' śhṛṇ'van'nūtibhis' sīda sādanam ॥ 10 ॥ (2)

नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् ।
न , ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥११॥

ni ṣhu sīīda gaṇapatē gaṇēṣhut'
tvāmāāhur'vip'ratamaṅ' kavīnām ।
na , ṛtēt' tvat'kriyatē kiñ' chanārē mahāmar'kam'
maghavañ'chit'ramar'cha ॥ 11 ॥

अभिख्या नो मघवन्नाधमानान्त्सखे बोधि वसुपते सखीनाम् ।

रणं कृधि रणकृत्सत्यशुष्माऽभक्ते चिदा भजा राये , अस्मान् ॥ १२ ॥

abhikh’yā nōō maghavan’nādhamānān’tsakhēē
        bōdhi vasupatē sakhīīnām ।
raṇaṅ’ṅ’ kṛdhi raṇakṛt’sat’yaśhuṣh’mā (a)bhak’tē
        chidā bhajā rāyē , as’mā-ne ॥ 12 ॥ (3)

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

## Hiraṇyagarbhas Sūktam

[RV 10-121, AV 4-2, SYMS 13-4, 23-1, 25-10, SYKS 14-4, 25-1. 27-14, TS 4-1-8, 2-8-2, tāṇḍya brāmhaṇa 9-9, nighaṇṭu 10-23]

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक , आसीत् ।

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १ ॥

ॐ hiraṇ’yagar’bhas’ samavar’tatāg’rēē
        bhūtas’ya jāta[fp]’ patirēka , āsī-te ।
sa dāādhāra pṛthivīn’ dyāmutēmāṅ’
        kas’maiī dēvāya haviṣhāā vidhēma ॥ 1 ॥

य , आत्मदा बलदा यस्य विश्व , उपासते प्रशिषं यस्य देवाः ।

यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ २ ॥

ya , āāt’madā baladā yas’ya viśh’va ,
        upāsatēp’ praśhiṣhañ’ yas’ya dēvā-ḥa ।
yas’ya chhāyāmṛtañ’ yas’ya mṛt’yu[hk]’
        kas’maiī dēvāya haviṣhāā vidhēma ॥ 2 ॥

यः प्राणतो निमिषतो महित्वैक , इद्राजा जगतो बभूव ।
य , ईशे , अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥

ya[fp]' prāāṇatō nimiṣhatō mahit'vaika ,
id'rājā jagatō babhūva |
ya , īśhēē , as'yad' dvipadaśh'chatuṣh'pada[hk]'
kas'maiī dēvāya haviṣhāā vidhēma || 3 ||

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥४॥

yas'yēmē himavan'n'tō mahit'vā yas'ya
samud'raṁ' rasayāā sahāhuḥu |
yas'yēmā[fp]' pradiśhō yas'ya bāhū
kas'maiī dēvāya haviṣhāā vidhēma || 4 ||

येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः ।
यो , अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥

yēnad' dyaurug'rā pṛthivī cha dṛḷ'hā
yēnas' svas' stabhitañ' yēna nākaḥa |
yō , an'tarik'ṣhē rajasō vimāna[hk]'
kas'maiī dēvāya haviṣhāā vidhēma || 5 ||

यं क्रन्दसी , अवसा तस्तभाने , अभ्यैक्षेतां मनसा रेजमाने ।
yaṅ' kran'dasī , avasā tas'tabhānē ,
abh'yaik'ṣhēētām' manasā rējamānē |

www.saiveda.net www.vedadhwa.com

यत्राधि सूर , उदितो विभाति कस्मै देवाय हविषा विधेम ॥६॥

yat’rādhi sūra , uditō vibhāti

kas’maiī dēvāya havişhāā vidhēma ॥ 6 ॥

आपो ह यद् बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥७॥

āpōō ha yad’ bṛhatīr’viśh’vamāyan’

gar’bhan’ dadhāāna janayan’n’tīrag’nim ।

tatōō dēvānāṁ’ samavar’tatāsurēka[hk]’

kas’maiī dēvāya havişhāā vidhēma ॥ 7 ॥

यश्चिदापो महिना पर्यपश्यद् दक्षं दधाना जनयन्तीर्यज्ञम् ।
यो देवेष्वधि देव , एक , आसीत् कस्मै देवाय हविषा विधेम ॥८॥

yaśh’chidāpōō mahinā par’yapaśh’yad’

dak’shan’ dadhāāna janayan’n’tīr’yaj’ñam ।

yō dēvēşh’vadhi dēva , ēka , āsīt’

kas’maiī dēvāya havişhāā vidhēma ॥ 8 ॥

मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान ।
यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥९॥

mā nōō hiṁ’sīj’janitā ya[fp]’ pṛthiv’yā

yō vā divaṁ’ṁ’ sat’yadharm’m’mā jajāna ।

yaśh’chāpaśh’chan’drā bṛhatīr’jajāna

kas’maiī dēvāya havişhāā vidhēma ॥ 9 ॥

www.sanskritweb.net www.vedavishwa.com

प्रजाॅपते न त्वदेतान्यन्यो विश्वाॅ जातानि परि ता बभूव ।
prajāāpatē nat' tvadētān'yan'yō
viśh'vāā jātāni pari tā babhūva ।

यत्कॉमास्ते जुहुमस्तन्नोॅ , अस्तु वयं स्यॉम पतयो रयीणाम् ॥१०॥
yat'kāāmās'tē juhumas'tan'nōō ,
as'tu vayaṁ' syāāma patayō rayīṇām ॥ 10 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

## Trisuparṇa Mantrāḥa

[KYV TA 10-38 to 10-40 ]

ॐ ब्रम्हमेतु माम् । मधुमेतु माम् । ब्रम्हमेव मधुमेतु माम् ।
ॐ bram'hamētu mām । madhumētu mām ।
bram'hamēva madhumētu mām ।

यास्ते सोम प्रजा वत्सोऽभि सो , अहम् । दुष्ष्वप्नहन्दुरुष्षह ।
yās'tē sōmap' prajā vat'sō (a)bhi sō , aham ।
duṣh'ṣhvap'nahan'durush'ṣhaha ।

यास्ते सोम प्राणाङ्स्ताञ्जुहोमि ॥१॥
yās'tē sōmap' prāṇāges'tāñ'juhōmi ॥ 1 ॥

त्रिसुपर्णमयाचितं ब्राम्हणाय दद्यात् ।
trisupar'ṇamayāchitam' brām'haṇāya dad'yā-te ।

www.saiveda.net
www.vedavishwa.com

ब्रम्हहत्यां वा , एते घ्नन्ति । ये ब्राँम्हणास्त्रिसुपर्णं पठन्ति ।

bram’hahat’yāṁ’ vā , ēteg’ ghnan’ti ।

yēb’ brāām’haṇās’trisupar’ṇam’ paṭhan’ti ।

ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ॐ ॥२॥

tē sōmam’ prāp’nuvan’ti ।

āsahas’rāt’paṅ’ktim’ punan’ti । ō-m ॥ 2 ॥

ब्रम्ह मेधयाँ । मधु मेधयाँ । ब्रम्हमेव मधु मेधयाँ ॥३॥

bram’ha mēdhayāā । madhu mēdhayāā ।

bram’hamēva madhu mēdhayāā ॥ 3 ॥

अद्या नौ देव सवितः प्रजावत्सावीस्सौभगम् ।

ad’yā nō dēva savita[fp]’ prajāvat’sāvīs’saubhagam ।

परा दुष्ष्वप्नियꣳ सुव । विश्वानि देव सवितर्दुरितानि परासुव ।

parā duṣh’ṣhvap’niyagm’ suva ।

viśh’vāni dēva savitar’duritāni parāsuva ।

यद्भद्रं तन्म , आसुव । मधु वाता , ऋतायते मधु क्षरन्ति सिन्धवः ॥४॥

yad’bhad’ran’ tan’ma , āsuva ।

madhu vātā , ṛtāyatē madhuk’

kṣharan’ti sin’dhavaḥa ॥ 4 ॥

माध्वीर्नस्सन्त्वोषधीः । मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः ।

mādh’vīīr’nas’san’tvōṣhadhī-ḥi ।

madhu nak’tamutōṣhasi

madhumat’pār’thivagm’ rajaḥa ।



www.saivedaiswa.net www.vedarishwa.com

मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाꣳ, अस्तु सूर्यः ।

madhud' dyauras'tu na[fp]' pitā ǀ

माध्वीर्गावो भवन्तु नः ॥५॥

madhu mān'nō

vanas'patir'madhumāgm' , as'tu sūr'yaḥa ǀ

mādh'vīr'gāvō bhavan'tu naḥa ǁ 5 ǁ

य , इमं त्रिसुपर्णमयाचितं ब्राम्हणाय दद्यात् । भ्रूणहत्यां वा , एते घ्नन्ति ।

ya , iman' trisupar'ṇamayāchitam'

brām'haṇāya dad'yā-te ǀ

bhrūṇahat'yāṁ' vā , ētēg' ghnan'ti ǀ

ये ब्राम्हणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति ।

आसहस्रात्पङ्क्तिं पुनन्ति । ॐ ॥६॥

yēb' brāām'haṇās'trisupar'ṇam' paṭhan'ti ǀ

tē sōmam' prāp'nuvan'ti ǀ

āsahas'rāt'paṅ'ktim' punan'ti ǀ ōm ǁ 6 ǁ

ब्रम्ह मेधवा । मधु मेधवा । ब्रम्हमेव मधु मेधवा ॥७॥

bram'ha mēdhavāā ǀ madhu mēdhavāā ǀ

bram'hamēva madhu mēdhavāā ǁ 7 ǁ

ब्रम्हा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।

bram'hā dēvānāām' padavī[hk]'

kavīnāmṛṣhir'vip'rāṇām' mahiṣhō mṛgāṇāām ǀ



www.saiveda.net
www.vedavishwa.com

श्येनो गृद्ध्राणाङ्ग् स्वधितिर्वनानाङ्ग् सोमः पवित्रमत्यैति रेभन्न् ॥८॥

śhyēnō gṛd'dhrāṇāges' svadhitir'vanānāgm'
sōma[fp]' pavit'ramat'yēti rēbhan'ne ॥ 8 ॥

हङ्ग्सश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।

hagm'saśh'śhuchiṣhad'vasuran'tarik'ṣhasad'dhōtā
vēdiṣhadatithir'durōṇasate ।

नृषद्वरसदृतसद्व्योमसदब्जा गोजा , ऋतजा , अद्रिजा , ऋतं बृहत् ॥९॥

nṛṣhad'varasadṛtasad'vyōmasadab'jā gōjā ,
ṛtajā , ad'rijā , ṛtam' bṛhate ॥ 9 ॥

ऋचे त्वा रुचे त्वा समित्स्रवन्ति सरितो न धेनाः ।

ṛchēt' tvā ruchēt' tvā samit'sravan'ti saritō
na dhēnāāḥa ।

अन्तर्हृदा मनसा पूयमानाः । घृतस्य धारा , अभिचाकशीमि ॥१०॥

an'tar'hṛdā manasā pūyamānā-ḥa ।
ghṛtas'ya dhārā , abhichākaśhīmi ॥ 10 ॥

हिरण्ययो वेतसो मद्ध्य , आसाम् ।

hiraṇ'yayō vētasō mad'dhya , āsām ।

तस्मिन्त्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः ।

tas'min'n'tsupar'ṇō madhukṛt'kulāyī
bhajan'nās'tē madhu dēvatāābh'yaḥa ।

www.sarvavedavishwa.com

तस्यासते हरयस्सप्त तीरे स्वधां दुहाना , अमृतस्य धाराम् ॥ ११ ॥

tas'yāsatē harayas'sap'ta tīrēēs' svadhān' duhānā ,
amṛtas'ya dhārāām ॥ 11 ॥

य , इदं त्रिसुपर्णमयाचितं ब्राम्हणाय दद्यात् ।

ya , idan' trisupar'ṇamayāchitam'
brām'haṇāya dad'yā-te ।

वीरहत्यां वा , एते घ्नन्ति । ये ब्राम्हणास्त्रिसुपर्णं पठन्ति ।

vīrahat'yāṁ' vā , ēteg' ghnan'ti ।
yēb' brāām'haṇās'trisupar'ṇam' paṭhan'ti ।

ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ॐ ॥१२॥

tē sōmam' prāp'nuvan'ti ।
āsahas'rāt'paṅ'ktim' punan'ti । ō-m ॥ 12 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

## Na Karmaṇā

[KYV – TA 10-12-3]

ॐ न कर्मणा न प्रजया धनेन त्यागेनैके , अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति ।

ॐ na kar'maṇā nap' prajayā dhanēnat' tyāgēnaikē ,
amṛtat'tvamānaśhuḥu ।
parēṇa nākan' nihitaṅ' guhāyāṁ'
vibh'rājadētad'yatayō viśhan'ti ।



www.vedavishwa.com

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रम्हलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ।

vēdān'tavij'ñāna suniśh'chitār'thās'
saṁ'nyāsa yōgād'yatayaśh' śhud'dhasat'tvāāḥa |
tēb' bram'halōkē tu paraān'takālē
parāmṛtāt'parimuch'yan'ti sar'vēē |

दह्रं विपापं परमेश्मभूतं यत्पुण्डरीकं पुरमध्यसङ्स्थम् ।
तत्रापि दह्रं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् ।

dah'raṁ' vipāpam' paramēē (a)śh'mabhūtañ'
yat'puṇ'ḍarīkam' puramadh'ya sag'ges'tham |
tat'rāpi dah'raṅ' gaganaṁ' viśhōkas'
tas'min'yadan'tas' tadupāsitav'yam |

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥

yō vēdādaus' svara[fp]' prōk'tō vēdān'tē chap'
pratiṣh'ṭhitaḥa |
tas'yap' prakṛti līnas'ya ya[fp]'
paras' sa mahēśh'varaḥa ||

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

1. Bhāgya Sūktam ............ 1
2. Īśhāvāsyōpaniṣhat ............ 3
3. Taittirīya Upaniṣhat – Śhīkṣhāvallī ............ 9
4. Taittirīya Upaniṣhat – Bramhānandavallī ............ 25
5. Taittirīya Upaniṣhat – Bhṛguvallī ............ 39
6. Sūryōpaniṣhat ............ 49
7. Bhū Sūktam ............ 57
8. Nīḻā Sūktam ............ 61
9. Dēvī Sūktam ............ 62
10. Śhrī Sūktam ............ 64
11. Gaṇapati Sūktam ............ 73
12. Hiraṇyagarbhas Sūktam ............ 76
13. Trisuparṇa Mantrāḥa ............ 79
14. Na Karmaṇā ............ 83





**R**oman **C**oloured **C**oding **S**cript
© www.saiveda.net

www.saiveda.net
www.vedavishwa.com